# Shri Jagannatha Vaidika Puja Paddhati

# શ્રીજગન્નાથ વૈદિક પૂજા પદ્ધતિ

## Document Information

Text title : Jagannatha Vaidika Puja Paddhati

File name : jagannAthavaidikapUjApaddhatiH.itx

Category : vishhnu, pUjA, jagannatha, vishnu, krishna

Location : doc_vishhnu

Author : Arun Kumar Upadhyay

Transliterated by : Arun Kumar Upadhyay

Proofread by : Arun Kumar Upadhyay

Latest update : July 13, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 13, 2024

*sanskritdocuments.org*

# શ્રીજગન્નાથ વૈદિક પૂજા પદ્ધતિ

## પુરુષસૂક્ત ઔર ઉત્તર નારાયણસૂક્ત

### પુરુષસૂક્તમ્

વાજસનેયિ માધ્યન્દિનશાખીય યજુર્વેદ, અધ્યાય ૩૧-

અથ પુરુષસૂક્તમ્ ।

ૐ તચ્છં યોરાવૃણીમહે । ગાતું યજ્ઞાય ।

ગાતું યજ્ઞપતયે । દૈવી સ્વસ્તિરસ્તુ નઃ ।

સ્વસ્તિર્માનુષેભ્યઃ । ઊર્ધ્વં જિગાતુ ભેષજમ્ ।

શન્નો અસ્તુ દ્વિપદે । શં ચતુષ્પદે ।

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

ૐ સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ।

સ ભૂમિઁ સર્વત સ્પૃત્વાઽત્યતિષ્ઠદ્દશાઙ્ગુલમ્ ॥ ૧॥

પુરુષ એવેદઁ સર્વં યદ્ભૂતઁ યચ્ચ ભાવ્યમ્ ।

ઉતામૃતત્વસ્યેશાનો યદન્નેનાતિરોહતિ ॥ ૨॥

એતાવાનસ્ય મહિમાતો જ્યાયાઁશ્ચ પૂરુષઃ ।

પાદોઽસ્ય વિશ્વા ભૂતાનિ ત્રિપાદસ્યામૃતન્દિવિ ॥ ૩॥

ત્રિપાદૂર્ધ્વઽ ઉદૈત્પુરુષઃ પાદોસ્યેહાભવત્પુનઃ ।

તતો વિષ્વઙ્વ્યક્રામત્ સાશનાનશને અભિ ॥ ૪॥

તતો વિરાડજાયત વિરાજોઽધિપૂરુષઃ ।

સ જાતોઽત્યરિચ્યત પશ્ચાદ્ ભૂમિમથો પુરઃ ॥ ૫॥

તસ્માદ્યજ્ઞાત્ સર્વહુતઃ સમ્ભૃતમ્પૃષદાજ્યમ્ ।

પશૂઁસ્તાઁશ્ચક્રે વાયવ્યાનારણ્યા ગ્રામ્યાશ્ચ  યે ॥ ૬॥

તસ્માદ્યજ્ઞાત્સર્વહુતઽઋચઃ  સામાનિ જજ્ઞિરે ।
છન્દાઁસિ જજ્ઞિરે  તસ્માદ્યજુસ્તસ્માદજાયત ॥ ૭॥

તસ્માદશ્વાઽજાયન્ત  યે કે ચોભયાદતઃ ।
ગાવો  હ જજ્ઞિરે  તસ્માત્તસ્માજ્જાતાઽજાવયઃ॥ ૮॥

તઁ યજ્ઞમ્બર્હિષિ  પ્રૌક્ષન્પુરુષઞ્જાતમગ્રતઃ ।
તેન  દેવાઽયજન્ત સાધ્યાઽઋષયશ્ચ  યે ॥ ૯॥

યત્પુરુષઁવ્યદધુઃ કતિધા વ્યકલ્પયન્ ।
મુખઙ્કિમસ્યાસીત્કિમ્બાહૂ કિમૂરૂ પાદાઽઉચ્યેતે ॥ ૧૦॥

બ્રાહ્મણોઽસ્ય  મુખમાસીદ્બાહૂ રાજન્યઃ  કૃતઃ ।
ઊરૂ તદસ્ય  યદ્વૈશ્યઃ  પદ્ભ્યાઁ શૂદ્રોઽજાયત ॥ ૧૧॥

ચન્દ્રમા  મનસો જાતશ્ચક્ષોઃ  સૂર્યોઽજાયત ।
શ્રોત્રાદ્વાયુશ્ચ  પ્રાણશ્ચ  મુખાદગ્નિરજાયત ॥ ૧૨॥

નાભ્યાઽસીદન્તરિક્ષઁ શીર્ષ્ણો દ્યૌઃ સમવર્તત ।
પદ્ભ્યામ્ભૂમિર્દિશઃ  શ્રોત્રાત્તથા  લોકાઁઽકલ્પયન્ ॥ ૧૩॥

યત્પુરુષેણ હવિષા  દેવા યજ્ઞમતન્વત ।
વસન્તોઽસ્યાસીદાજ્યઙ્ગ્રીષ્મઽઇધ્મ શરદ્ધવિઃ ॥ ૧૪॥

સપ્તાસ્યાસન્પરિધયસ્ત્રિઃ સપ્ત સમિધઃ  કૃતાઃ ।
દેવા યદ્યજ્ઞન્તન્વાનાઽબધ્નન્પુરુષમ્પશુમ્ ॥ ૧૫॥

યજ્ઞેન  યજ્ઞમયજન્ત દેવાસ્તાનિ  ધર્માણિ પ્રથમાન્યાસન્ ।
તે હ  નાકમ્મહિમાનઃ  સચન્ત  યત્ર  પૂર્વે સાધ્યાઃ સન્તિ  દેવાઃ ॥ ૧૬॥

## ઉત્તર નારાયણ સૂક્ત

અદ્ભ્યઃ સમ્ભૃતઃ પૃથિવ્યૈ રસાચ્ચ વિશ્વકર્મણઃ  સમવર્તતાગ્રે  ।
તસ્ય  ત્વષ્ટા  વિદધદ્રૂપમેતિ  તન્મર્ત્યસ્ય દેવત્વમાજાનમગ્રે॥ ૧૭॥

વેદાહમેતમ્પુરુષમ્મહાન્તમાદિત્યવર્ણન્તમસઃ પરસ્તાત્ ।
તમેવ વિદિત્વાતિ મૃત્યુમેતિ નાન્યઃ પન્થા વિદ્યતેયનાય ॥ ૧૮॥
પ્રજાપતિશ્ચરતિ ગર્ભેઽન્તરજાયમાનો બહુધા વિજાયતે ।
તસ્ય યોનિમ્પરિપશ્યન્તિ ધીરાસ્તસ્મિન્હ તસ્થુર્ભુવનાનિ વિશ્વા ॥ ૧૯॥
યો દેવેભ્યઽતપતિ યો દેવાનામ્પુરોહિતઃ ।
પૂર્વો યો દેવેભ્યો જાતો નમો રુચાય બ્રાહ્મયે ॥ ૨૦॥
રુચમ્બ્રાહ્મઞ્જનયન્તો દેવાઽગ્રે તદબ્રુવન્ ।
યસ્ત્વૈવમ્બ્રાહ્મણો વિદ્યાત્તસ્ય દેવાઽસન્વશે ॥ ૨૧॥
શ્રીશ્ચ તે લક્ષ્મીશ્ચ પત્ન્યાવહોરાત્રે પાર્શ્વે નક્ષત્રાણિ રૂપમશ્વિનૌ વ્યાત્તમ્ ।
ઇષ્ણન્નિષાણામુમ્મઽઇષાણ સર્વલોકમ્મઽઇષાણ ॥ ૨૨॥
ૐ તચ્છં યોરાવૃણીમહે । ગાતું યજ્ઞાય ।
ગાતું યજ્ઞપતયે । દૈવીસ્સ્વસ્તિરસ્તુ નઃ ।
સ્વસ્તિર્માનુષેભ્યઃ । ઊર્ધ્વં જિગાતુ ભેષજમ્ ।
શન્નો અસ્તુ દ્વિપદે । શં ચતુષ્પદે ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

## અથ પુરુષ સૂક્ત વિધિઃ

ૐ અસ્ય સહસ્રશીર્ષેતિ ષોડશર્ચસ્ય પુરુષસૂક્ત મહામન્ત્રસ્ય નારાયણ ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ ।
અન્ત્યાયા ત્રિષ્ટુપ્ છન્દઃ ।
જગદ્બીજં પુરુષો દેવતા ।
પુરુષ એવેદં - ઇતિ બીજમ્ ।
યજ્ઞેન યજ્ઞમ્- ઇતિ શક્તિઃ ।
એતાવાન્-ઇતિ કીલકમ્ ।
મમ સકલાભીષ્ટ સિદ્ધ્યર્થે ધન- ધાન્ય -પુત્રાદિ સકલ સમ્પત્ સમૃદ્ધ્યર્થે શ્રીમન્નારાયણ પ્રીતિ દ્વારા સર્વવિધ પુરુષાર્થ સમ્પત્તયે ન્યાસ- પૂજા- પાઠ- હવનાભિષેકેષુ વિનિયોગઃ ।
ઇતિ ॥

## અથ ઋષ્યાદિન્યાસઃ

ૐ શ્રીમન્નારાયણર્ષયે નમઃ શિરસિ ।
ૐ જગત્કારણ પુરુષ દેવતાયૈ નમો હૃદયે ।
ૐ અનુષ્ટુપ્ -ત્રિષ્ટુપ્-છન્દોભ્યાં નમો મુખે ।
ૐ પુરુષ એવેદં -ઇતિ બીજાય નમો નાભૌ ।
ૐ યજ્ઞેન યજ્ઞમ્-ઇતિ શક્તયે નમઃ કટ્યામ્ ।
ૐ એતાવાન્ -ઇતિ કીલકાય નમઃ પાદૌ ।
મમ સકલાભીષ્ટ સિદ્ધ્યર્થે ધન -ધાન્ય- પુત્રાદિ સકલ સમ્પત્ સમૃદ્ધ્યર્થે શ્રીમન્નારાયણ પ્રીતિ દ્વારા સર્વવિધ પુરુષાર્થ સમ્પત્તયે પુરુષ સૂક્ત -ન્યાસ -પૂજા- પાઠ - હવનાભિષેકેષુ વિનિયોગાય નમઃ સર્વાઙ્ગેષુ ।
ઇતિ ॥

## અથ ઋચાદ્યઙ્ગન્યાસઃ

ૐ સહસ્રશીર્ષા - ઇતિ વામ કરે ૧ ।
ૐ પુરુષ એવેદં- ઇતિ દક્ષિણ કરે ૨ ।
ૐ એતાવાનસ્ય - ઇતિ વામ પાદે ૩ ।
ૐ ત્રિપાદૂર્ધ્વ - ઇતિ દક્ષિણ પાદે ૪ ।
ૐ તતો વિરાડ- ઇતિ વામ જાનૌ ૫ ।
ૐ તસ્માદ્યજ્ઞાત્ - ઇતિ દક્ષિણ જાનૌ ૬ ।
ૐ તસ્માદ્યજ્ઞાત્સર્વહુત ઋચઃ- ઇતિ વામ કટ્યાં ૭ ।
ૐ તસ્માદશ્વા - ઇતિ દક્ષિણ કટ્યાં ૮ ।
ૐ તં યજ્ઞં - ઇતિ નાભૌ ૯ ।
ૐ યત્પુરુષં - ઇતિ હૃદયે ૧૦ ।
ૐ બ્રાહ્મણોઽસ્ય - ઇતિ કણ્ઠે૧૧ ।
ૐ ચન્દ્રમા મનસો - ઇતિ વામ બાહૌ ૧૨ ।
ૐ નાભ્યા આસી - ઇતિ દક્ષિણ બાહૌ ૧૩ ।
ૐ યત્પુરુષેણ - ઇતિ મુખે ૧૪ ।
ૐ સપ્તાસ્યાસન્-ઇતિ નેત્રયોઃ ૧૫ ।
ૐ યજ્ઞેન યજ્ઞં -ઇતિ મૂર્ધ્નિ ૧૬ ।
ઇતિ ॥

## અથ કરન્યાસઃ

ॐ બ્રાહ્મણોऽસ્ય -ઇત્યઙ્ગુષ્ઠાભ્યાં નમઃ ।

ॐ ચન્દ્રમા - ઇતિ તર્જનીભ્યાં નમઃ ।

ॐ નાભ્યા-ઇતિ મધ્યમાભ્યાં નમઃ ।

ॐ યત્પુરુષેણ - ઇત્યનામિકાભ્યાં નમઃ ।

ॐ સપ્તાસ્યાસન્ - ઇતિ કનિષ્ઠિકાભ્યાં નમઃ ।

ॐ યજ્ઞેન -ઇતિ કરતલ કરપૃષ્ઠાભ્યાં નમઃ ।

ઇતિ ॥

## અથ હૃદયાદિન્યાસઃ

ॐ બ્રાહ્મણોऽસ્ય-ઇતિ હૃદયાય નમઃ ।

ॐ ચન્દ્રમા-ઇતિ શિરસે સ્વાહા ।

ॐ નાભ્યા-ઇતિ શિખાયૈ વષટ્ ।

ॐ યત્પુરુષેણ-ઇતિ કવચાય હુમ્ ।

ॐ સપ્તાસ્યાસન્-ઇતિ નેત્રાભ્યાં વૌષટ્ ।

ॐ યજ્ઞેન યજ્ઞં -ઇતિ અસ્ત્રાય ફટ્ ।

ॐ ભૂર્ભુવઃ સ્વરોમિતિ દિગ્બન્ધઃ ।

ઇતિ ॥

## અથ નારાયણધ્યાનમ્

ધ્યેયઃ સદા સવિતૃ મણ્ડલ મધ્યવર્તી, નારાયણ સરસિજાસન સન્નિવિષ્ટઃ ।

કેયૂરવાન્ મકર કુણ્ડલવાન્ કિરીટી, હારી હિરણ્મય વપુર્ધૃત શઙ્ખ-ચક્રઃ ॥ ૧॥

## અથ છન્દો લક્ષણમ્

મૃત્યુભીતૈઃ પુરા દેવૈરાત્મનશ્છાદનાય ચ ।

છન્દાંસિ સંસ્મૃતાનીહ છાદિતાસ્તૈસ્તતોऽમરાઃ ॥

છાદનાશ્છન્દ ઉદ્દિષ્ટં વાસસી કૃત્તિરેવ ચ ।

છન્દોભિરાવૃતં સર્વં વિદ્યાત્સર્વત્ર નાન્યતઃ ॥

(બૃહત્ પરાશર સ્મૃતિ, ૨/૩૯-૪૦)

## અથ દેવતાલક્ષણં

યસ્મિન્ મન્ત્રે તુ યો દેવસ્તેન દેવેન ચિહ્નિતમ્ ।
મન્ત્રં તદ્દૈવતં વિદ્યાત્ સન્તિ તત્ર તુ દેવતાઃ ॥ ૪૧॥

## અથ ઋષિલક્ષણં

યેન યદ્ ઋષિણા દૃષ્ટં સિદ્ધિઃ પ્રાપ્તા તુ યેન વૈ ।
મન્ત્રેણ તસ્ય સઃ પ્રોક્તો મુનિ ભાવસ્તદાત્મકઃ ॥ ૪૨॥

## અથ વિનિયોગલક્ષણં

યત્ર કર્માણિ ચારબ્ધે જપ-હોમાર્ચનાદિકે ।
ક્રિયન્તે યેન મન્ત્રેણ વિનિયોગસ્તુ સઃ સ્મૃતઃ ॥ ૪૩॥

## અથ બ્રાહ્મણલક્ષણં

અસ્ય મન્ત્રસ્ય ચાર્થોઽયમયં મન્ત્રોઽત્ર વર્તતે ।
તત્તસ્ય બ્રાહ્મણં જ્ઞેયં મન્ત્રસ્યેતિ શ્રુતિ ક્રમઃ ॥ ૪૪॥

એતદ્ધિ પઞ્ચકં જ્ઞાત્વા ક્રિયતે કર્મ યદ્ દ્વિજઃ ।
તદનન્ત ફલં તેષાં ભવેદ્વેદ નિદર્શનાત્ ॥ ૪૫॥

છન્દો દૈવતમાર્ષં ચ વિનિયોગં ચ બ્રાહ્મણમ્ ।
મન્ત્રં પઞ્ચવિધં જ્ઞાત્વા દ્વિજઃ કર્મ સમારભેત્ ॥ ૨૯૪॥

દદ્યાત્ પુરુષ સૂક્તેન આપઃ પુષ્પાણિ ચૈવ હિ ।
અર્ચિતં સ્યાદિદં તેન વિશ્વં ભુવન સપ્તકમ્ ॥ ૩૮૦॥

અનુષ્ટુભસ્ય સૂક્તસ્ય ત્રિષ્ટુબન્તસ્ય દેવતા ।
પુરુષો યો જગદ્-બીજં ઋષિ-ર્નારાયણઃ સ્મૃતઃ ॥ ૩૮૧॥

એતાન્યવિદિત્વા યોઽધીતે ઽનુબ્રૂતે જપતિ જુહોતિ યજતે યાજયતે તસ્ય બ્રહ્મ નિર્વીર્યં યાતયામઃ ભવત્યથાતરાશ્વ ગર્તં વા પદ્યતે સ્થાણું વર્ચ્છતિ પ્રમીયતે વા પાપીયામ્ભવત્યથ વિજ્ઞાયૈતાનિ યોઽધીતે તસ્ય વીર્યવદથ યોઽર્થવિત્તસ્ય વીર્યવત્તરં ભવતિ જપિત્વા હુત્વેષ્ટ્વા તત્ફલેન યુજ્યતે । (સર્વાનુક્રમણિકા, ૧/૧)

## અથ ન્યાસપ્રમાણમ્

પ્રથમાં વિન્યસેદ્વામે દ્વિતીયાં દક્ષિણે કરે ।
તૃતીયાં વામ પાદે ચ ચતુર્થી દક્ષિણે ન્યસેત્ ॥ ૩૮૪॥

પઞ્ચમી વામ જાનૌ તુ ષષ્ઠી વૈ દક્ષિણે ન્યસેત્ ।
સપ્તમીં વામ કટ્યાં તુ દક્ષિણસ્યાં તથાષ્ટમીમ્ ॥ ૩૮૫॥

નવમીં નાભિ મધ્યે તુ દશમીં હૃદયે તથા ।
એકાદશીં વામ કુક્ષૌ દ્વાદશી દક્ષિણે ન્યસેત્ ॥ ૩૮૬॥

કણ્ઠે ત્રયોદશીં ન્યસ્ય તથા વક્ત્રે ચતુર્દશીમ્ ।
અક્ષ્ણોઃ પઞ્ચદશીં ચૈવ વિન્યસેન્-મૂર્ધ્નિ ષોડશીમ્ ॥ ૩૮૭॥

એવં ન્યાસવિધિં કૃત્વા પશ્ચાત્ પૂજાં સમારભેત્ ॥ ૩૮૮॥

(બૃહત્ પારાશર સ્મૃતિ, અધ્યાય ૨)વૃદ્ધ હારીત સ્મૃતિ, અધ્યાય ૮ અપિ ।

## અથ નારાયણ પૂજા ક્રમઃ

સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ।
સ ભૂમિં સર્વત સ્પૃત્વાત્યતિષ્ઠદ્દશાઙ્ગુલમ્ ॥ ૧॥

શ્રીમતે નારાયણાય નમઃ આવાહનં સમર્પયામિ ॥ ૧॥

પુરુષ એવેદં સર્વં યદ્ ભૂતં યચ્ચ ભાવ્યમ્ ।
ઉતામૃતત્વસ્યેશાનો યદન્નેનાતિરોહતિ ॥ ૨॥

શ્રીમતે નારાયણાય નમઃ, આસનં સમર્પયામિ ॥ ૨॥

એતાવાનસ્ય મહિમાતો જ્યાયાઁશ્ચ પૂરુષઃ ।
પાદોઽસ્ય વિશ્વા ભૂતાનિ ત્રિપાદસ્યામૃતં દિવિ ॥ ૩॥

શ્રીમતે નારાયણાય નમઃ, પાદ્યં સમર્પયામિ ॥ ૩॥

ત્રિપાદૂર્ધ્વ ઉદૈત્ પુરુષઃ પાદોઽસ્યેહાભવત્ પુનઃ ।

તતો વિશ્વઙ્ વ્યક્રામત્ સાશનાનશને અભિ ॥ ૪॥

શ્રીમતે નારાયણાય નમઃ, અર્ઘ્યં સમર્પયામિ ॥ ૪॥

તતો વિરાડજાયત વિરાજો અધિપૂરુષઃ ।
સ જાતો અત્યરિચ્યત પશ્ચાદ્ ભૂમિમથો પુરઃ ॥ ૫॥

શ્રીમતે નારાયણાય નમઃ આચમનીયં સમર્પયામિ ॥ ૫॥

તસ્માદ્યજ્ઞાત્ સર્વહુતઃ સમ્ભૃતં પૃષદાજ્યમ્ ।
પશૂઁતાઁશ્ચક્રે વાયવ્યાનારણ્યાન્ ગ્રામ્યાશ્ચ યે ॥ ૬॥

શ્રીમતે નારાયણાય નમઃ સ્નાનં સમર્પયામિ ॥ ૬॥

તસ્માદ્યજ્ઞાત્ સર્વહુતઃ ઋચઃ સામાનિ જજ્ઞિરે ।
છન્દાંસિ જજ્ઞિરે તસ્માદ્યજુસ્તસ્માદજાયત ॥ ૭॥

શ્રીમતે નારાયણાય નમઃ વસ્ત્રં સમર્પયામિ ॥ ૭॥

તસ્માદશ્વા અજાયન્ત યે કે ચોભયાદતઃ ।
ગાવો હ જજ્ઞિરે તસ્માત્તસ્માજ્જાતા અજાવયઃ ॥ ૮॥

શ્રીમતે નારાયણાય નમઃ યજ્ઞોપવીતં સમર્પયામિ ॥ ૮॥

તં યજ્ઞં બર્હિષિ પ્રૌક્ષન્ પુરુષં જાતમગ્રતઃ ।
તેન દેવા અયજન્ત સાધ્યા ઋષયશ્ચ યે ॥ ૯॥

શ્રીમતે નારાયણાય નમઃ ગન્ધં સમર્પયામિ ॥ ૯॥

યત્પુરુષં વ્યદધુઃ કતિધા વ્યકલ્પયન્ ।
મુખં કિમાસ્યાસીત્ કિં બાહૂ કિમૂરૂ પાદા ઉચ્યેતે ॥ ૧૦॥

શ્રીમતે નારાયણાય નમઃ પુષ્પં સમર્પયામિ ॥ ૧૦॥

બ્રાહ્મણોઽસ્ય મુખમાસીદ્ બાહૂ રાજન્યઃ કૃતઃ ।
ઊરૂ તદસ્ય યદ્વૈશ્યઃ પદ્ભ્યાં શૂદ્રો અજાયત ॥ ૧૧॥

શ્રીમતે નારાયણાય નમઃ ધૂપમાઘ્રાપયામિ ॥ ૧૧॥

ચન્દ્રમા મનસો જાતશ્ચક્ષોઃ સૂર્યો અજાયત ।
શ્રોત્રાદ્વાયુશ્ચ પ્રાણશ્ચ મુખાદગ્નિરજાયત ॥ ૧૨॥

શ્રીમતે નારાયણાય નમઃ દીપં દર્શયામિ ॥ ૧૨॥

નાભ્યા આસીદન્તરિક્ષં શીર્ષ્ણો દ્યૌઃ સમવર્તત ।
પદ્ભ્યાં ભૂમિર્દિશઃ શ્રોત્રાત્તથા લોકાનકલ્પયન્ ॥ ૧૩॥

શ્રીમતે નારાયણાય નમઃ નૈવેદ્યં નિવેદયામિ ॥ ૧૩॥

યત્પુરુષેણ હવિષા દેવા યજ્ઞમતન્વત ।
વસન્તોઽસ્યાસીદાજ્યં ગ્રીષ્મ ઇધ્મઃ શરદ્ધવિઃ ॥ ૧૪॥

શ્રીમતે નારાયણાય નમઃ નમસ્કારં સમર્પયામિ ॥ ૧૪॥

સપ્તાસ્યાસન્ પરિધયસ્ત્રિઃ સપ્તસમિધઃ કૃતાઃ ।
દેવા યદ્યજ્ઞં તન્વાના અબધ્નન્ પુરુષં પશુમ્ ।(। ૧૫॥)
શ્રીમતે નારાયણાય નમઃ પ્રદક્ષિણાં સમર્પયામિ ॥ ૧૫॥

યજ્ઞેન યજ્ઞમયજન્ત દેવાસ્તાનિ ધર્માણિ પ્રથમાન્યાસન્ ।
તેહ નાકં મહિમાનઃ સચન્ત યત્ર પૂર્વે સાધ્યાઃ સન્તિ દેવાઃ ।। ૧૬॥
શ્રીમતે નારાયણાય નમઃ સપુષ્પાઞ્જલિં વિસર્જનં સમર્પયામિ ॥ ૧૬॥ —-।ઇતિ ।

## અથ નારાયણ પૂજા પ્રમાણમ્

આદ્યયાવાહયેદ્દેવમૃચા તુ પુરુષોત્તમમ્ ।
દ્વિતીયયાસનં દદ્યાત્ પાદ્યં ચૈવ તૃતીયયા ॥ ૩૯૪॥

અર્ઘ્યશ્ચતુર્થ્યાં દાતવ્યઃ પઞ્ચમ્યાચમનં તથા ।
ષષ્ઠ્યા સ્નાનં પ્રકુર્વીત સપ્તમ્યા વસ્ત્ર ધૌતકમ્ ॥ ૩૯૫॥

યજ્ઞોપવીતં ચાષ્ટમ્યા નવમ્યા ગન્ધમેવ ચ ।
પુષ્પ દેયં દશમ્યા તુ એકાદશ્યા ચ ધૂપકમ્ ॥ ૩૯૬॥

દ્વાદશ્યા દીપકં દદ્યાત્ ત્રયોદશ્યા નિવેદનમ્ ।
ચતુર્દશ્યા નમસ્કારં પઞ્ચદશ્યા પ્રદક્ષિણાઃ ॥ ૩૯૭॥

ષોડશ્યોદ્વાસનં કુર્યાદ્ દેવ-દેવસ્ય ચક્રિણઃ ।
સ્નાનં વસ્ત્રં ચ નૈવેદ્યે દદ્યાચમનં હરેઃ ॥ ૩૯૮॥

(બૃહત્ પારાશર સ્મૃતિ, અધ્યાય, ૨)— ।ઇતિ ।

## અથ ષોડશોપચારાઃ

આવાહનાસને પાદ્યમર્ઘ્યમાચમનીયકમ્ ।
સ્નાનં વસ્ત્રોપવીતે ચ ગન્ધ માલ્યાદિભિઃ ક્રમાત્ ॥ ૧॥

ધૂપં દીપં ચ નૈવેદ્યં નમસ્કારં પ્રદક્ષિણામ્ ॥ ૨॥ (પાઞ્ચરાત્ર)

## અથ પઞ્ચોપચારાઃ

ધ્યાનમાવાહનં ચૈવ ભક્ત્યા યચ્ચ નિવેદનમ્ ।
નીરાજનં પ્રણામશ્ચ પઞ્ચ પૂજોપચારકાઃ ॥ (જાબાલિ, ૧)
ગન્ધ પુષ્પે ધૂપ દીપો નૈવેદ્યઃ પઞ્ચતે ક્રમાત્ । (પાઞ્ચરાત્ર)

## અથ દશોપચારાઃ

અર્ઘ્યં પાદ્યઞ્ચાચમનં સ્નાનં વસ્ત્ર નિવેદનમ્ ।
ગન્ધાદયો નૈવેદ્યાન્તા ઉપચારા દશ ક્રમાત્ ॥ (જ્ઞાનમાલા)

## અથાષ્ટત્રિંશદુપચારાઃ

અર્ઘ્યં પાદ્યમાચમનં મધુપર્કમુપસ્પૃશમ્ ।
સ્નાનં નીરાજનં ભૂષા દર્પણાલોકનં તતઃ ॥

ગન્ધ પુષ્પે ધૂપ દીપૌ નૈવેદ્યં ચ તતઃ ક્રમાત્ ।
પાનીયં તોયમાચામં હસ્ત વાસસ્તતઃ પરમ્ ॥

તામ્બૂલમનુલેપં ચ પુષ્પદાનં તતઃ પુનઃ ।
ગીતં વાદ્યં તથા નૃત્યં સ્તુતિં ચૈવ પ્રદક્ષિણાઃ ॥

પુષ્પાઞ્જલિ નમસ્કારાવષ્ટત્રિંશત્સમીરિતાઃ । (જ્ઞાનમાલા)

## અથ રાજોપચારાઃ

તતઃ પઞ્ચામૃતાભ્યઙ્ગમઙ્ગસ્યોદ્વર્તનં તથા । મધુપર્ક પરિમલ દ્રવ્યાણિ વિવિધાનિ ચ ।
પાદુકાં દોલનાદર્શં વ્યઞ્જનં છત્ર ચામરે ।
વાદ્યાર્તિક્યં નૃત્યગીત શય્યા રાજોપચારકાઃ ॥ (સંસ્કાર ભાસ્કર)

# અથ કલશાદિ પૂજા

સુવાસિત જલૈઃ પૂર્ણ સવ્યે કુમ્ભં સુપૂજયેત્ ।
મમ નામાઙ્કિતાં ઘણ્ટાં સુદર્શન યુતાં યદિ ॥

મમાગ્રે સ્થાપયેદ્યસ્તુ તસ્ય દેહે વસામ્યહમ્ ।
ઘણ્ટાં સમ્પૂજ્ય મધ્યે ત્વાગમાર્થમિતિ વાદયેત્ ॥

નિવેશયેત્ પુરો ભાગે ગન્ધં પુષ્પં ચ ભૂષણમ્ ।
દીપં દક્ષિણતો દદ્યાત્ પુરો નૈવ તુ વામતઃ ।
વામતસ્તુ તથા ધૂપમગ્રે વા ન તુ દક્ષિણે । (પૂજા સાગર)

ધૂપે નીરાજને સ્નાને પૂજાકાલે વિલેપને ।
મમાગ્રે વાદયન્ ઘણ્ટામુત્તમં લભતે ફલમ્ ॥

(સ્કન્દ પુરાણ, ૨ વૈષ્ણવ ખણ્ડ, ૨/૫/૬/૨૦)
સ્નાને ધૂપે તથા દીપે નૈવેદ્યે ભૂષણે તથા ।
ઘણ્ટા નાદં પ્રકુર્વીત તથા નીરાજને ઽપિ ચ ॥ (કાલિકા પુરાણ)

કુર્યાદાવાહનં મૂર્ત્તૌ મૃન્મયાં સર્વદૈવ હિ ।
પ્રતિમાયાં જલે વહ્નૌ નાવાહન વિસર્જને ॥ (વાચસ્પતિ)
આસને પઞ્ચ પુષ્પાણિ સ્વાગતે ષટ્ શુભાનિ ચ । (નારદ પાઞ્ચરાત્ર, ૪/૯/૩)
પૂરયિત્વા શુભ જલં પાત્રેષુ કુસુમૈર્યુતમ્ ।
દ્રવ્યાણિ નિક્ષિપેત્તેષુ મઙ્ગલાનિ યથા ક્રમાત્ ॥ ૭૨॥

ઉશીરં ચન્દનં કાષ્ઠં પાદ્ય પાત્રે વિનિક્ષિપેત્ ।
વિષ્ણુ-ક્રાન્તં ચ દૂર્વાં ચ કૌશેયાંસ્તિલસર્ષપાન્ ॥ ૭૩॥

અક્ષતાંશ્ચ ફલં પુષ્પમર્ઘ્ય પાત્રે વિનિક્ષિપેત્ ।
જાતીફલં ચ કર્પૂર મેલાં ચાચમનીયકે ॥ ૭૪॥

મકરન્દં પ્રવાલં ચ રત્નં સૌવર્ણમેવ ચ ।
તાનિ દદ્યાત્ સ્નાનપાત્રે ધાત્રી સુરતરું તથા ॥ ૭૫॥

દ્રવ્યાણામપ્યલાભે તુ તુલસી પત્રમેવ ચ ।
ચન્દનં વા સુવર્ણં વા કૌશેયં વા વિનિક્ષિપેત્ ॥ ૭૬॥

સૌવર્ણાનિ ચ રૌપ્યાણિ તામ્રકાંસ્યં પ્રયોજયેત્ ।
પાત્રાણિ ચોદ્ધરણ્યા ચ દદ્યાત્ પાદ્યાદિકં તથા ॥ ૭૭॥

(વૃદ્ધ હારીત સ્મૃતિ, અધ્યાય, ૭)
ગવ્યમાજ્યં દધિક્ષીરં માક્ષિકં શર્કરાન્વિતમ્ ।
એકત્ર મિલિતં જ્ઞેયં દિવ્યં પઞ્ચામૃતં પરમ્ ॥ (ધન્વન્તરિ)

રજની સહદેવી ચ શિરીષં લક્શ્મનાપિ ચ ।
સહભદ્રા કુશાગ્રાણિ ઉદ્વર્તનમિહોચ્યતે ॥ (આહ્નિક સૂત્ર)

હરિદ્રા કુઙ્કુમં ચૈવ સિન્દૂરાદિ સમન્વિતમ્ ।
કજ્જલં કણ્ઠ સૂત્રાદિ સૌભાગ્ય દ્રવ્યમુચ્યતે ॥

આસ્નાત્વા તુલસીં છિત્વા યઃ પૂજાં કુરુતે જનઃ ।
સોઽપરાધી ભવેત્સત્યં તત્સર્વં નિષ્ફલં ભવેત્ ॥ (વાયુ પુરાણ)

દેવાર્થે તુલસીચ્છેદો હોમાર્થે સમિધાં તથા ।
ઇન્દુક્ષયે ન દુષ્યેત ગવાર્થે તુ તૃણસ્ય ચ ॥ (પદ્મ પુરાણ)

પઙ્કજં પઞ્ચરાત્રં સ્યાદ્દશરાત્રં ચ બિલ્વકમ્ ।
એકાદશાહં તુલસી નૈવ પર્યુષિતા ભવેત્ ॥

જાતી શમી કુશાઃ કઙ્કુ મલ્લિકા કરવીરજમ્ ।
નાગ પુન્નાગકાશોક રક્ત નીલોત્પલાનિ ચ ॥

ચમ્પકં બકુલં ચૈવ પદ્મં બિલ્વં પવિત્રકમ્ ।
એતાનિ સર્વ દેવાનાં સઙ્ગ્રાહ્યાણિ સમાનિ ચ ॥

હિરુકા કઙ્કુણં દારુ મલ્લિકાગુરુ વાસિતા ।
શઙ્ખ જાતીફલં શ્રીમત્ પ્રિયા ધૂપા હરેરિમે ॥ (વામન પુરાણ)

ન મિશ્રીકૃત્ય દદ્યાત્તુ દીપં સ્નેહે ઘૃતાદિકમ્ ।
ઘૃતેન દીપકં નિત્યં તિલ તૈલેન વા પુનઃ ॥ (કાલિકા પુરાણ)

જ્વાલયેન્ મુનિશાર્દૂલ સન્નિધૌ જગદીશિતુઃ ।
કાર્પાસ વર્તિકા ગ્રાહ્યા ન દીર્ઘા ન ચ સૂક્ષ્મકા ॥

એકાં વિનાયકે કુર્યાદ્ દ્વે સૂર્યે તિસ્ર ઈશ્વરે ।
ચતસ્રઃ કેશવે કુર્યાત્ સપ્તાશ્વત્થે પ્રદક્ષિણાઃ । (બહ્વૃચ પરિશિષ્ટ)

## અથ મન્ત્ર પુષ્પાઞ્જલિઃ

ૐ તદ્વિષ્ણોઃ પરમં પદં સદા પશ્યન્તિ સૂરયઃ ।
દિવીવ ચક્ષુરાતતમ્ ॥ ૧॥

તદ્વિપ્રાસો વિપન્યવો જાગૃવાંસઃ સમિન્ધતે ।
વિષ્ણોર્યત્ પરમં પદં પર્યાપ્તાનન્તરાયાય ॥ ૨॥

સર્વસ્તોમો ઽતિરાત્રમુત્તમં મહર્ભવતિ ।
સર્વસ્યાપત્યૈ સર્વસ્ય જિત્યૈ સર્વમેવ તેનાપ્નોતિ ॥ ૩॥

રાજાધિરાજાય પ્રસહ્યસાહિને, નમો વયં વૈશ્રવણાય કુર્મહે ।
સ મે કામાન્કામકામાય મહ્યમ્, કામેશ્વરો વૈશ્રવણો દદાતુ ॥

કુબેરાય વૈશ્રવણાય મહારાજાય નમઃ ॥ ૪॥

ૐ સ્વસ્તિ સામ્રાજ્યં ભૌજ્યં સ્વારાજ્યં વૈરાજ્યમ્ ।
પારમેષ્ઠ્યં રાજ્યં મહારાજ્યમાધિપત્યમયં, સમન્ત પર્યાયી સ્યાત્ સાર્વભૌમઃ સર્વાયુષઃ ।
આન્તાદાપરાર્ધાત્ પૃથિવ્યૈ સમુદ્ર પર્યન્તાયાઃ, એકરાડિતિ તદપ્યેષઃ શ્લોકોઽભિગીતઃ ॥ ૫॥

મરુતઃ પરિવેષ્ટારો મરુત્તસ્યા વસન્ ગૃહે ।
આવિક્ષિતસ્ય કામપ્રે વિશ્વેદેવાઃ સભાસદઃ ॥ ૬॥

વિશ્વતશ્ચક્ષુરુત વિશ્વતો મુખો, વિશ્વતો બાહુરુત વિશ્વતસ્પાત્ ।
સં બાહુભ્યાં ધમતિ સમ્પતત્રૈઃદ્યાવા-ભૂમી જનયન્ દેવ એકઃ ॥ ૭॥

ૐ નારાયણાય વિદ્મહે, વાસુદેવાય ધીમહિ, તન્નો વિષ્ણુઃ પ્રચોદયાત્ ॥ ૮॥

યજ્ઞેન યજ્ઞમયજન્ત દેવાસ્તાનિ ધર્માણિ પ્રથમાન્યાસન્ ।
તે હ નાકં મહિમાનઃ સચન્ત યત્ર પૂર્વે સાધ્યાઃ સન્તિ દેવાઃ ॥ ૯॥

## અથ ચક્રાબ્જ મણ્ડલ રચના પ્રકારઃ

ચન્દનાર્દ્રાણિ સત્રાણિ પશ્ચિમતઃ પ્રાચીનં દક્ષિણત ઉદીચીનં સપ્તદશ વારં પાતયેત્ । તેન ષટ્ પઞ્ચાશદધિક દ્વિશત સઙ્ખ્યકાનિ કોષ્ઠકાનિ સમ્પદ્યન્તે । તેષુ મધ્યે ષટ્ ત્રિંશત્ કોષ્ઠાનિ માર્જયિત્વા મધ્યે શઙ્કું સ્થાપયિત્વા સૂત્ર માર્ગેણ વૃત્તાનિ સમાનિ પઞ્ચ બિમ્બાનિ યથા સમ્પદ્યેરંસ્તથા ભ્રામયિત્વા પ્રથમ વૃત્તસ્ય મધ્યે કર્ણિકા ક્ષેત્રં કલ્પયેત્ । તત્રાષ્ટૌ વિન્દવઃ પ્રકલ્પનીયાઃ । દ્વિતીય બિમ્બં ત્રિધા પ્રથમં કેશરાન્ દ્વિતીયે દલાનિ તૃતીયં નાભિં પ્રકલ્પ્ય તત્ર ભાગ-ત્રયં કુર્યાત્ । તદ્ બહિં બિમ્બ-દ્વયે દ્વાદશાક્ષરાણિ કલ્પયિત્વા પઞ્ચમે બિમ્બે નેમિં કલ્પયેત્ । નેમેશ્ચ ભાગદ્વયં કુર્યાત્ । તદ્ બહિરષ્ટાવિંશતિ કોષ્ઠે ચતુરસ્રં પીઠં પ્રકલ્પ્ય તદ્ બહિરશીતિ કોષ્ઠે વીથીં ચ પ્રકલ્પ્ય તત્ર લતા પ્રતાનાદિકં વિરચ્ય તદ્

બહિઃ પઙ્ક્તિદ્વયસ્થ દ્વાદશાધિકૈકશતસઙ્ખ્યકેષુ કોષ્ઠેષુ પ્રતિદિશં મધ્યે કોષ્ઠ-ચતુષ્ટયેન દ્વાર-ચતુષ્ટયં પ્રકલ્પ્ય, તત્ પાર્શ્વે બાહ્ય પઙ્ક્તિસ્થ કોષ્ઠત્રયેણ અન્તઃ પઙ્ક્તિસ્થ કોષ્ઠેન ચ ઉપશોભાઃ પ્રકલ્પ્ય અવશિષ્ટ કોષ્ઠ દ્વયેન શઙ્ખાન્ પ્રકલ્પયેત્ ।

## અથ ચક્રાબ્જ મણ્ડલે રક્તાદિવર્ણ પૂરણ વિધિઃ

પીતેન વર્ણેન કર્ણિકાં શુક્લેન વિન્દૂન્ પાટલેન કર્ણિકા રેખાં કેશરાવનિં દ્વિધા વિભજ્ય પૂર્વ ભાગં દ્વિધા વિભજ્ય પૂર્વ પીતૈરુત્તરં રક્તૈસ્તદન્તર્ભાગેષુ શ્વેતૈર્વિન્દૂન્ શ્યામૈઃ કેશરાન્તરાલાનિ રક્તૈર્દલરેખિકા દલાગ્રાણિ રક્તૈર્દલમૂલાનિ શુક્લૈસ્તદન્તરાલાનિ શ્યામૈસ્તદન્તર્વલયં રક્તૈર્નાભિરેખાં શ્યામૈરરેખાં કૃષ્ણૈરરાણિ રક્તૈસ્તદન્તરાલાનિ શ્યામૈસ્તદન્તર્વલયં કૃષ્ણૈઃ કલ્પયેત્ । નેમિ ભાગં દ્વિધા વિભજ્ય પ્રથમં કૃષ્ણેન દ્વિતીયં શુક્લેન પીઠં પીતૈર્વીથીં લતા પ્રતાનાદિકં હરિતવર્ણઃ શુક્લૈઃ શોભા રક્તૈરુપશોભાઃ પીતૈરર્ધશોભાઃ શ્યામૈઃ પૂર્વાદિ દ્વારચતુષ્ટયં ક્રમેણ શુક્લ રક્ત પીત કૃષ્ણૈરુત્તરાદિ કોણાનિ અરુણેન તત્ર શઙ્ખાન્ શુક્લેન વર્ણેન પ્રકલ્પ્ય દલાનિ વિન્દૂંશ્ચાષ્ટૌ પ્રકલ્પયેત્ । કેશરાણિ ચ તત્ર । ઇતિપાદ્મ સંહિતાયામ્ ।

૧. નાભેર્બહિર્મણ્ડલયોર્દ્વાદશારાણિ કલ્પયેત્ । (ઈશ્વર સંહિતા, ૧૧/૧૬૩)

૨. કેશરત્રિતયં કુર્યાત્ પત્રે પત્રે ઽરુણપ્રભમ્ । (૧૫૬)

૩. કૃષ્ણાનિ સર્વશોભાનિ દ્વારોદ્દેશસ્થિતાનિ ચ । તદર્ધાકૃતિતુલ્યાનિ । (૧૫૬)

૪. કોણાનિ કેશરાભાનિ સિત શઙ્ખાન્વિતાનિ ચ । (૧૫૦)

૫. બહિરાવરણં યદ્વૈ સત્વાદ્યં ત્રિતયં હિ યત્ । (૧૫૩)

૬. લતા પ્રતાનં વીથ્યાં વૈ કુર્યાદ્ધારીત વર્ણકમ્ ।

૭. શ્વેત રક્તસ્તુ પાટલઃ । (અમરકોષ, ૧/૫/૧૪)

ચક્રાબ્જ મણ્ડલે વર્ણાઃ-૧ વિન્દુ-શ્વેત, ૨ વિન્દુ પીત, ૩ વિન્દુ-કૃષ્ણ, ૪ વિન્દુ-પાટલ, ૫ વિન્દુ-રક્ત, ૬ વિન્દુ-અરુણ, ૭। લતા પ્રતાનાદિ-હરિત વર્ણ ।

## અથ ચક્રાબ્જ મણ્ડલ દેવતાધ્યાનમ્

રજાંસિ વિદ્ધિ ભૂતાનિ સિત પીતાદિકાનિ ચ ।
તન્માત્રાણ્યુપશોભાનિ શોભાનિ કરણાનિ ચ ॥ ૧॥

એવં સર્વાણિ કોણાનિ સદ્વારાણીન્દ્રિયાણિ ચ ।
બહિરાવરણં યદ્વૈ સત્વાદ્ય ત્રિતયં હિ યત્ ॥ ૨॥

મનઃ સુવિતતા વીથિર્ગર્વઃ પીઠમુદાહૃતમ્ ।
શ્રીઃ પદ્મં તદધિષ્ઠાતા બીજાત્મા ચિન્મયઃ પુમાન્ ॥ ૩॥

અમૂર્ત ઈશ્વરશ્ચાત્ર તિષ્ઠત્યાનન્દ લક્ષણઃ ।

યસ્ય સન્દર્શનાદેવ શશ્વદ્ ભાવઃ પ્રસીદતિ ॥ ૪॥

અઙ્ગ ન્યાસાદિકં કુર્યાત્ સર્વ કાર્યેષુ સર્વદા ।
સર્વદા પ્રણવં દદ્યાદાદૌ મન્ત્રસ્ય પાર્થિવ ॥ ૫॥ (પાઞ્ચરાત્ર)

અથ દક્ષિણે જાનુનિ દક્ષિણોત્તરૌ પાણી સવ્યસ્ય પાણેરઙ્ગુષ્ઠ વર્જિતાશ્ચતસ્રોઽઙ્ગુલીઃ કૃત્વા સવ્યાઙ્ગુષ્ઠં દક્ષિણાઙ્ગુષ્ઠેન વેષ્ટયિત્વા તામ્બૂલ પૂગીફલ હિરણ્યાક્ષતોદકમાદાય વેષ્ટયિત્વા મહા સઙ્કલ્પં કુર્યાત્ ।

## અથ મહાસઙ્કલ્પઃ

ૐ તત્સદદ્યાસ્ય શ્રીશેષ શેષાસન વિષ્વક્સેનાદિ નિત્યસૂરિ નિર્વિશેષૈરશેષ સજ્જન સમ્ભાવનીયૈરવમ્ભવદવદ્ય ગન્ધૈરનાદિ માયા મહાવર્ત બભ્રમ્યમાણ બાહ્ય કથકરં ભાવન ગન્ધ સિન્ધુરૈરધિજિગમિષિત મુક્તિ ઘણ્ટા પથૈરખણ્ડ દિઙ્મણ્ડલ વ્યાપિ યશો વિતાન વલિત જગત્ ત્રિતયૈરૌપનિષદ્ રહસ્યોપદેશિકૈઃ શ્રીમચ્છઠરિપુનાથ યામુન યતિવર સૌમ્યવર વાદિભીકરાદિ દિવ્ય દેશિકૈઃ પરમ વ્યોમ શ્વેતદ્વીપ ક્ષીરસાગર શ્રીરઙ્ગ વૃષગિરિ સત્યવ્રત યદુગિરિ પુરુષોત્તમ સાકેત મથુરા સિદ્ધાશ્રમાદિ દિવ્યાભિવ્યક્તિ પ્રદેશેષુ સમનુષ્ઠિત મઙ્ગલાશાસન નિખિલ સુરાસુર મુકુટમણિ મઞ્જરી નિકર નીરાજિત પાદ પીઠસ્ય શરણાગત પરિત્રાણ સપ્ત તન્તુ દીક્ષા-દીક્ષિતસ્ય સરસીરુહ વાસિની સહ ચરિત ધર્મણઃ સંસરણ દવ દહન તાપ નિર્વાણ બલાહકસ્ય જગદ્રક્ષણ શિક્ષા વિચક્ષણસ્ય અચ્યુતાનન્દ વીર્યસ્ય મહાજાલક મધ્ય પરિભ્રામ્યમાણાનેક કોટિ સૂર્ય પ્રભા સમેતસ્ય શ્રીભૂમિ નીલા કુચકલશ વિન્યસ્ત કુઙ્કુમાઙ્કિત વક્ષસ્થલસ્ય શેષ પર્યઙ્કુ શાયિનઃ શઙ્ખ-ચક્ર-ગદા ખડ્ગ શાર્ઙ્ગ પદ્મ હસ્ત વિરાજિતસ્ય સૌશીલ્ય વાત્સલ્યાદિ ગુણ ગણૌઘ મહાર્ણવસ્ય શ્રીમન્ નારાયણસ્યેચ્છયા નાભિ કમલોદ્ભૂત સકલ લોક પિતામહસ્ય બ્રહ્મણઃ સૃષ્ટિં કુર્વતસ્તદુદ્ધરણાય પ્રાર્થિતસ્ય મહાપુરુષસ્ય અચિન્ત્યા-પરિમિત શક્ત્યા મહા જલૌઘ મધ્યે પરિભ્રમ-માના-મનેક કોટિ બ્રહ્માણ્ડાનામેકતમે ઽવ્યક્ત મહદહઙ્કાર પૃથિવ્યપ્ તેજો વાય્વાકાશાદ્યૈરાવૃતેહ્યસ્મિન્ મહતિ બ્રહ્માણ્ડ ખણ્ડે શ્રીમદાદિવરાહ દંષ્ટ્રાગ્ર વિરાજિતે ભૂ લોકે જમ્બૂ દ્વીપે ભારત ખણ્ડે આર્યાવર્ત્તૈક દેશાન્તર્ગતે (સ્થન નામઃ)પરાર્ધ દ્વય જીવિનો બ્રહ્મણો દ્વિતીયે પરાર્ધે એક પઞ્ચાશત્તમે વર્ષે શ્વેતવારાહ કલ્પે વૈવસ્વત મન્વન્તરે અષ્ટાવિંશતિ તમે કલિ યુગે કલિ પ્રથમ ચરણે બૌદ્ધાવતારે અમુક સઙ્ખ્યક વિક્રમ સંવત્સરે અમુક નામ્નિ સંવત્સરે (અયન, ઋતુ, માસ, પક્ષ, તિથિ, વાસર, નક્ષત્ર, ગુરુ રાશિ)શેષેસુ ગ્રહેષુ યથાસ્થાન સ્થિતેષુ એવં ગુણ વિશેષણ વિશિષ્ટાયાં શુભ પુણ્ય તિથૌ (ગોત્ર નામ)સર્વ પાપ નિરાસ પૂર્વક-
મહા પાપોપપાપાનિ નાના યોનિ કૃતાનિ ચ ।
બાલ ભાવેન યત્ પાપં ક્ષુતૃડર્થે ચ યત્ કૃતમ્ ॥ ૧॥

આત્માર્થં ચૈવ યત્ પાપં પરાર્થે ચૈવ યત્ કૃતમ્ ।
તીર્થેષુ ચૈવ યત્ પાપં ગુર્વવજ્ઞા કૃતઞ્ચ યત્ ॥ ૨॥

રાગ દ્વેષાદિ જનિતં કામ ક્રોધેન યત્ કૃતમ્ ।
હિંસા નિદ્રાદિજં પાપં ભેદ દૃષ્ટ્યા ચ યત્ કૃતમ્ ॥ ૩॥

શુષ્કમાર્દ્રઞ્ચ યત્ પાપં જાનતાજાનતા કૃતમ્ ।
દેહાભિમાનજં પાપં સર્વદા સઞ્ચિતં ચ યત્ ॥ ૪॥

બ્રહ્મહા મદ્યપઃ સ્તેયી તથૈવ ગુરુ તલ્પગઃ ।
મહા પાપાનિ ચત્વારિ તત્ સંસર્ગી ચ પઞ્ચમઃ ॥ ૫॥

અતિ પાતકમન્યચ્ચ તન્ન્યૂનમુપપાતકમ્ ।
ગો વધો વ્રાત્યતા સ્તેયમૃણાનાં ચાનપક્રિયા ॥ ૬॥

અનાહિતાગ્નિતા પણ્ય વિક્રયઃ પરિવેદનમ્ ।
ઇન્ધનાર્થે દ્રુમચ્છેદ સ્ત્રી હિંસૌષધિ જીવનમ્ ॥ ૭॥

હિંસા યાત્રા વિધાનઞ્ચ ભૃતકાધ્યાપનં તથા ।
પ્રથમાશ્રમમારભ્ય યત્કિઞ્ચિત્ કિલ્બિષં કૃતમ્ ॥ ૮॥

કૃમિ કીટાદિ હનનં યત્કિઞ્ચિત્ પ્રાણિ હિંસનમ્ ।
માતા પિત્રોરશુશ્રૂષા તદ્વાક્યાકરણં તથા ॥ ૯॥

અપૂજ્ય પૂજનં ચૈવ પૂજ્યાનાઞ્ચ વ્યતિક્રમઃ ।
અનાશ્રમસ્થતાઞ્ચાદિ દેવાશુશ્રૂષણં તથા ॥ ૧૦॥

પર કાર્યાપહરણં પરદ્રવ્યોપજીવનમ્ ।
તતોઽજ્ઞાન કૃતં પાપં કાયિકં વાચિકં તથા ॥ ૧૧॥

માનસં ત્રિવિધં વાપિ પ્રાયશ્ચિત્તૈરનાશિતમ્ ।
તસ્માદશેષ પાપેભ્યસ્ત્રાહિ ત્રૈલોક્યપાવન ॥ ૧૨॥

ઋદ્ધયે પુષ્ટયે ચાપિ સિદ્ધયે ભક્તિલબ્ધયે ।
શિવાય મુક્તયે ચૈવ વૃદ્ધયે સર્વ કર્મણામ્ ॥ ૧૩॥

મન્ત્રાણાં દેશિકાનાઞ્ચ સ્થાનાનામપિ સર્વદા ।
પુત્ર મિત્ર કલત્રાણાં દાસી દાવ ગવામપિ ॥ ૧૪॥

વેદ શાસ્ત્રાગમાદીનાં વ્રતાનામિષ્ટ સમ્પદામ્ ।
મનોરથાનાં સર્વેષાં હિતાનાં પરિલબ્ધયે ॥ ૧૫॥

આયુરારોગ્ય મેધાનાં ધનધાન્યાદિ સમ્પદામ્ ।
પુણ્યાનામણિમાદીનાં ગુણાનાં શ્રેયસામપિ ॥ ૧૬॥

રાજ્ઞો જનપદસ્યાપિ યજમાનસ્ય મન્ત્રિણામ્ ।
વૈષ્ણવાનાં વિશેષેણ પરત્ર હિતમિચ્છતામ્ ॥ ૧૭॥

સત્સન્તાન પ્રાપ્ત્યર્થં જ્ઞાન ભક્તિ વૈરાગ્યાદિ પ્રાપ્ત્યર્થં ભગવદ્ ભાગવતાચાર્ય કૈઙ્કર્યા વિચ્છિન્ન સન્તાનેનાહરહર્વૃદ્ધ્યર્થં રાષ્ટ્રસ્ય દુર્ભિક્ષાદિ નિવૃત્તિ પૂર્વક તત્કાલ સમ્ભાવિત શસ્ય વૃદ્ધ્યર્થમસ્મિન્ સ્થાને સર્વેષાં બ્રાહ્મણ ક્ષત્રિય વૈશ્ય શૂદ્રાણાં યથાભિલષિત મનસ્કામના સિદ્ધ્યર્થં શ્રીમન્નારાયણસ્ય અશેષ ચિદચિદ્વસ્તુ શેષીભૂતસ્ય સત્ય જ્ઞાનાનન્દામલત્વ સ્વરૂપસ્ય શ્રી ભૂમિ નીલા નાયકસ્ય જ્ઞાન શક્તિ બલૈશ્વર્ય વીર્ય શક્તિત્વ પરમ કારુણિકત્વ કૃતજ્ઞત્વ સ્થિરત્વં પરિપૂર્ણત્વ પર મોદજ્ઞાક્ષરત્વમાર્દવાર્જવ સૌગન્ધ્ય સૌકુમાર્યાદિ દિવ્ય ગુણ ગણ મહાર્ણવસ્ય અભિનવ જલધર સુન્દર દિવ્ય મઙ્ગલ વિગ્રહ વિશિષ્ટસ્ય ભગવતઃ પૂજનં કરિષ્યે ।

## અથાગમોક્ત ભગવદારાધન ક્રમઃ ।

## અથ ધ્યાનમ્ ।

શાન્તાકારં ભુજગ શયનં પદ્મનાભં સુરેશં, વિશ્વાધારં ગગન સદૃશં મેઘવર્ણં શુભાઙ્ગમ્ ।
લક્ષ્મીકાન્તં કમલનયનં યોગિભિર્ધ્યાનગમ્યં, વન્દે વિષ્ણું ભવ ભય હરં સર્વ લોકૈકનાથમ્ ॥ ૧॥

ૐ આવાહયે તં ગરુડોપરિ સ્થિતં, રમાર્ધ દેહં સુર રાજ વન્દિતમ્ ।
કંસાન્તકં ચક્ર ગદાબ્જ હસ્તં, ભજામિ દેવં વસુદેવ સૂનુમ્ ॥ ૨॥

શ્રીમતે નારાયણાય નમઃ, આવાહનં સમર્પયામિ ॥ ૨॥

અસ્યૈઃ પ્રાણાઃ પ્રતિષ્ઠન્તુ અસ્યૈઃ પ્રાણાઃ ક્ષરન્તુ ચ ।
અસ્યૈ દેવત્વમર્ચાયૈ મામહેતિ ચ કશ્ચન ॥ ૩॥

શ્રીમતે નારાયણાય નમઃ, પ્રાણં પ્રતિષ્ઠાપયાયામિ ॥ ૩॥

રમ્યં સુશોભનં દિવ્યં સર્વસૌખ્યકરં શુભમ્ ।
આસનં ચ મયા દત્તં ગૃહાણ પરમેશ્વર ॥ ૪॥

શ્રીમતે નારાયણાય નમઃ, આસનં સમર્પયામિ ॥ ૪॥

તાપત્રય હરં દિવ્યં પરમાનન્દ સમ્ભવમ્ ।
તાપત્રય વિમોક્ષાય તવાર્ઘ્યં કલ્પયામ્યહમ્ ॥ ૫॥

શ્રીમતે નારાયણાય નમઃ, અર્ઘ્યં સમર્પયામિ ॥ ૫॥

યદ્ ભક્તિલેશ સમ્પર્કાત્ પરમાનન્દ સમ્ભવઃ ।
તસ્મૈ તે પરમેશાય પાદ્યં શુદ્ધાય કલ્પયે ॥ ૬॥

શ્રીમતે નારાયણાય નમઃ, પાદ્યં સમર્પયામિ ॥ ૬॥

દેવાનામપિ દેવાય દેવાનાં દેવતાત્મને ।
આચામં કલ્પયામીશ ચાત્મનાં શુદ્ધિ હેતવે ॥ ૭॥

શ્રીમતે નારાયણાય નમઃ, આચમનીયં સમર્પયામિ ॥ ૭॥

સર્વ કલ્મષ હીનાય પરિપૂર્ણ મુખાત્મને ।
મધુપર્કમિદં દેવં કલ્પયામિ પ્રસીદ મે ॥ ૮॥

શ્રીમતે નારાયણાય નમઃ, મધુપર્કં સમર્પયામિ ॥ ૮॥

ઉચ્છિષ્ટો ઽપ્યશુચિર્વાપિ યસ્ય સ્મરણ માત્રતઃ ।
શુદ્ધિમાપ્નોતિ તસ્મૈ તે પુનરાચમનીયકમ્ ॥ ૯॥

શ્રીમતે નારાયણાય નમઃ, પુનરાચમનીયં સમર્પયામિ ॥ ૯॥

પરમાનન્દ બોધાય નિમગ્ન નિજ મૂર્તયે ।
સાઙ્ગોપાઙ્ગમિદં સ્નાનં કલ્પયામ્યહમીશ તે ॥ ૧૦॥

શ્રીમતે નારાયણાય નમઃ, સ્નાનં સમર્પયામિ ॥ ૧૦॥

સર્વતીર્થ સમાયુક્તં સુગન્ધિં નિર્મલં જલમ્ ।
આચમ્યતાં મયા દત્તં ગૃહીત્વા પરમેશ્વર ॥ ૧૧॥

શ્રીમતે નારાયણાય નમઃ, સ્નાનાન્તે પુનરાચમનીયં સમર્પયામિ ॥ ૧૧॥

કામધેનુ સમુત્પન્નં સર્વેષાં જીવનં પરમ્ ।
પાવનં યજ્ઞ હેતુશ્ચ પયઃ સ્નાનાર્થમર્પિતમ્ ॥ ૧૨॥

શ્રીમતે નારાયણાય નમઃ, દુગ્ધ સ્નાનં સમર્પયામિ ॥ ૧૨॥

પયસસ્તુ સમુદ્ભૂતં મધુરામ્લં શશિપ્રભમ્ ।
દધ્યાનીતં મયા દેવ સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥ ૧૩॥

શ્રીમતે નારાયણાય નમઃ, દધિ સ્નાનં સમર્પયામિ ॥ ૧૩॥

નવનીત સમુત્પન્નં સર્વ સન્તોષ કારકમ્ ।
ઘૃતં તુભ્યં પ્રદાસ્યામિ સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥ ૧૪॥

શ્રીમતે નારાયણાય નમઃ, ઘૃત સ્નાનં સમર્પયામિ ॥ ૧૪॥

તરુ પુષ્પ સમુદ્ભૂતં સુસ્વાદુ મધુરં મધુ ।
તેજઃ પુષ્ટિકરં દિવ્યં સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥ ૧૫॥

શ્રીમતે નારાયણાય નમઃ, મધુ સ્નાનં સમર્પયામિ ॥ ૧૫॥

ઇક્ષુસાર સમુદ્ભૂતા શર્કરા પુષ્ટિ કારિકા ।
મલાપહારિકા દિવ્યા સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥ ૧૬॥

શ્રીમતે નારાયણાય નમઃ, શર્કરા સ્નાનં સમર્પયામિ ॥ ૧૬॥

પયો દધિ ઘૃતં ચૈવ મધું ચ શર્કરાયુતમ્ ।
પઞ્ચામૃતં મયાનીતં સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥ ૧૭॥

શ્રીમતે નારાયણાય નમઃ, પઞ્ચામૃત સ્નાનં સમર્પયામિ ॥ ૧૭॥

મન્દાકિન્યાસ્તુ યદ્ વારિ સર્વપાપહરં શુભમ્ ।
તદિદં કલ્પિતં દેવ સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥ ૧૮॥

શ્રીમતે નારાયણાય નમઃ, શુદ્ધોદક સ્નાનં સમર્પયામિ ॥ ૧૮॥

મલયાચલ સમ્ભૂતં ચન્દનાગરુ સમ્ભવમ્ ।
ચન્દનં દેવ દેવેશ સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥ ૧૯॥

શ્રીમતે નારાયણાય નમઃ, ગન્ધોદક સ્નાનં સમર્પયામિ ॥ ૧૯॥

નાના સુગન્ધિ દ્રવ્યં ચ ચન્દનં રજની યુતમ્ ।
ઉદ્વર્તનં મયા દત્તં સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥ ૨૦॥

શ્રીમતે નારાયણાય નમઃ, ઉદ્વર્તન સ્નાનં સમર્પયામિ ॥ ૨૦॥

મન્દાકિન્યાઃ સમાનીતૈ ર્હેમામ્ભોરુહ વાસિતૈઃ ।
સ્નાનં કુરુષ્વ દેવેશ સલિલૈશ્ચ સુગન્ધિભિઃ ॥ ૨૧॥

શ્રીમતે નારાયણાય નમઃ, ગઙ્ગોદક સ્નાનં સમર્પયામિ ॥ ૨૧॥

માયાચિત્ર પટાછન્ન નિજ ગુહ્યોરુ તેજસે ।
નિવારણ વિજ્ઞાય વાસસ્તે કલ્પયામ્યહમ્ ॥ ૨૨॥

શ્રીમતે નારાયણાય નમઃ, વસ્ત્રં સમર્પયામિ ॥ ૨૨॥

યમાશ્રિત્ય મહામાયા જગત્ સમ્મોહિની સદા ।
તસ્મૈ તે પરમેશાય કલ્પયામ્યુત્તરીયકમ્ ॥ ૨૩॥

શ્રીમતે નારાયણાય નમઃ, ઉત્તરીયં સમર્પયામિ ॥ ૨૩॥

યસ્ય શક્તિ ત્રયેણેદં સમ્પ્રોતમખિલં જગત્ ।
યજ્ઞસૂત્રાય તસ્મૈ તે યજ્ઞસૂત્રં પ્રકલ્પયે ॥ ૨૪॥

શ્રીમતે નારાયણાય નમઃ, યજ્ઞસૂત્રં સમર્પયામિ ॥ ૨૪॥

સ્વભાવ સુન્દરાઙ્ગાય નાના શક્ત્યાશ્રયાય ચ ।
ભૂષણાનિ વિચિત્રાણિ કલ્પયામિ સુરાર્ચિત ॥ ૨૫॥

શ્રીમતે નારાયણાય નમઃ, ભૂષણાનિ સમર્પયામિ ॥ ૨૫॥

સમસ્ત દેવ દેવેશ સર્વ તૃપ્તિકરં પરમ્ ।
અખણ્ડાનન્દ સમ્પૂર્ણં ગૃહાણ જલમુત્તમમ્ ॥ ૨૬॥

શ્રીમતે નારાયણાય નમઃ, જલં સમર્પયામિ ॥ ૨૬॥

શ્રીખણ્ડ ચન્દનં દિવ્યં ગન્ધાઢ્યં સુમનોહરમ્ ।
વિલેપનં સુરશ્રેષ્ઠ ચન્દનં પ્રતિગૃહ્યતામ્ ॥ ૨૭॥

શ્રીમતે નારાયણાય નમઃ ગન્ધ વિલેપનં સમર્પયામિ ॥ ૨૭॥

પરમાનન્દ સૌભાગ્ય પરિપૂર્ણ દિગન્તરમ્ ।
ગૃહાણ પરમં ગન્ધં કૃપયા પરમેશ્વર ॥ ૨૮॥

શ્રીમતે નારાયણાય નમઃ, ગન્ધં સમર્પયામિ ॥ ૨૮॥

સુષ્ઠુ ચન્દન સમ્મિશ્રં પારિજાત સમુદ્ભવમ્ ।
મયા દત્તં ગૃહાણાશુ ચન્દનં ગન્ધ સંયુતમ્ ॥ ૨૯॥

શ્રીમતે નારાયણાય નમઃ, ચન્દનં સમર્પયામિ ॥ ૨૯॥

કુઙ્કુમં કામના દિવ્યં કામના કામ સમ્ભવમ્ ।
કુઙ્કુમેનાર્ચિતો દેવ ગૃહાણ પરમેશ્વર ॥ ૩૦॥

શ્રીમતે નારાયણાય નમઃ, કુઙ્કુમં સમર્પયામિ ॥ ૩૦॥

અબીરં ચ ગુલાલં ચ ચોવા ચન્દનમેવ ચ ।
અબીરેણાર્ચિતો દેવ અતઃ શાન્તિં પ્રયચ્છ મે ॥ ૩૧॥

શ્રીમતે નારાયણાય નમઃ, અબીરં સમર્પયામિ ॥ ૩૧॥

અક્ષતાશ્ચ સુરશ્રેષ્ઠ કુઙ્કુમાક્તાઃ સુશોભિતાઃ ।
મયા નિવેદિતા ભક્ત્યા ગૃહાણ પરમેશ્વર ॥ ૩૨॥

શ્રીમતે નારાયણાય નમઃ, અક્ષતં સમર્પયામિ ॥ ૩૨॥

તુરીય વન સમ્ભૂતં નાના ગુણ મનોહરમ્ ।
સુમન્દ સૌરભં પુષ્પં ગૃહ્યતામિદમુત્તમમ્ ॥ ૩૩॥

શ્રીમતે નારાયણાય નમઃ, પુષ્પં સમર્પયામિ ॥ ૩૩॥

માલ્યાદીનિ સુગન્ધીનિ માલેત્યાદીનિ વૈ પ્રભો ।
મયાનીતાનિ પુષ્પાણિ ગૃહાણ પરમેશ્વર ॥ ૩૪॥

શ્રીમતે નારાયણાય નમઃ, પુષ્પમાલાં સમર્પયામિ ॥ ૩૪॥

તુલસી હેમરૂપાં ચ રત્ન રૂપાં ચ મઞ્જરીમ્ ।
ભવ મોક્ષ પ્રદાં તુભ્યમર્પયામિ હરિપ્રિયામ્ ॥ ૩૫॥

શ્રીમતે નારાયણાય નમઃ, તુલસી પત્રં સમર્પયામિ ॥ ૩૫॥

શમીં મે શમય મે પાપં શમી લોહિત કણ્ટકા ।
ધારિણ્યર્જુન બાણાનાં રામસ્ય પ્રિયવાદિની ॥ ૩૬॥

શ્રીમતે નારાયણાય નમઃ, શમી પત્રં સમર્પયામિ ॥ ૩૬॥

વિષ્ણ્વાદિ સર્વ દેવાનાં દૂર્વે ત્વં પ્રીતિદા સદા ।
ક્ષીર સાગર સમ્ભૂતે વંશ વૃદ્ધિકરી ભવ ॥ ૩૭॥

શ્રીમતે નારાયણાય નમઃ, દૂર્વાં સમર્પયામિ ॥ ૩૭॥

તૈલાનિ ચ સુગન્ધીનિ દ્રવ્યાણિ વિવિધાનિ ચ ।
મયા દત્તાનિ લેપાર્થં ગૃહાણ પરમેશ્વર ॥ ૩૮॥

શ્રીમતે નારાયણાય નમઃ, સુગન્ધ તૈલં સમર્પયામિ ॥ ૩૮॥

હરિદ્રા કુઙ્કુમં ચૈવ સિન્દૂર કજ્જલાન્વિતમ્ ।
સૌભાગ્ય દ્રવ્ય સંયુક્તં ગૃહાણ પરમેશ્વર ॥ ૩૯॥

શ્રીમતે નારાયણાય નમઃ, સૌભાગ્ય દ્રવ્યં સમર્પયામિ ॥ ૩૯॥

રત્ન કઙ્કણ વૈદૂર્ય મુક્તા હારાદિકાનિ ચ ।
સુપ્રસન્નેન મનસા દત્તાનિ સ્વીકુરુષ્વ ભોઃ ॥ ૪૦॥

શ્રીમતે નારાયણાય નમઃ, મુક્તા હારં સમર્પયામિ ॥ ૪૦॥

વનસ્પતિ રસોદ્ભૂતો ગન્ધાઢ્યઃ સુમનોહરઃ ।

આઘ્રેયઃ સર્વ ભૂતાનાં ધૂપોઽયં પ્રતિગૃહ્યતામ્ ॥ ૪૧॥

શ્રીમતે નારાયણાય નમઃ, ધૂપં આઘ્રાપયામિ ॥ ૪૧॥

સુપ્રકાશો મહાદીપઃ સર્વતસ્તિમિરાપહઃ ।
સ બાહ્યાભ્યન્તરં જ્યોતિ દીપોઽયં પ્રતિગૃહ્યતામ્ ॥ ૪૨॥

શ્રીમતે નારાયણાય નમઃ, દીપં દર્શયામિ ॥ ૪૨॥

હસ્ત પ્રક્ષાલનં કરોમિ ।
સત્પાત્ર સિદ્ધં સુભગં વિવિધાનેક ભક્ષણમ્ ।
નિવેદયામિ દેવેશ સાનુગાય ગૃહાણ તત્ ॥ ૪૩॥

શ્રીમતે નારાયણાય નમઃ, નૈવેદ્યં નિવેદયામિ ॥ ૪૩॥

એલો શીર લવઙ્ગાદિ કર્પૂર પરિવાસિતમ્ ।
પ્રાસનાર્થં કૃતં તોયં ગૃહાણ પરમેશ્વર ॥ ૪૪॥

શ્રીમતે નારાયણાય નમઃ, મધ્યે પાનીયં સમર્પયામિ ॥ ૪૪॥

બીજપૂરામ્ર પનસ ખર્જૂરી કદલી ફલમ્ ।
નારિકેલ ફલં દિવ્યં ગૃહાણ પરમેશ્વર ॥ ૪૫॥

શ્રીમતે નારાયણાય નમઃ, ઋતુફલં સમર્પયામિ ॥ ૪૫॥

કર્પૂર વાસિતં તોયં મન્દાકિન્યા સમાહૃતમ્ ।
આચમ્યતાં જગન્નાથ મયા દત્તં હિ ભક્તિતઃ ॥ ૪૬॥

શ્રીમતે નારાયણાય નમઃ, પુનરાચમનીયં સમર્પયામિ ॥ ૪૬॥

ફલેન ફલિતં સર્વં ત્રૈલોક્યં સચરાચરમ્ ।
તસ્માત્ ફલ પ્રદાનેન પૂર્ણાઃ સન્તુ મનોરથાઃ ॥ ૪૭॥

શ્રીમતે નારાયણાય નમઃ, અખણ્ડ ઋતુફલં સમર્પયામિ ॥ ૪૭॥

પૂગી ફલં મહદ્દિવ્યં નાગવલ્લી દલૈર્યુતમ્ ।
એલા ચૂર્ણાદિ સંયુક્તં તામ્બૂલં પ્રતિગૃહ્યતામ્ ॥ ૪૮॥

શ્રીમતે નારાયણાય નમઃ, તામ્બૂલં સમર્પયામિ ॥ ૪૮॥

હિરણ્યગર્ભ ગર્ભસ્થં હેમબીજં વિભાવસોઃ ।
અનન્ત પુણ્ય ફલદમતઃ શાન્તિં પ્રયચ્છ મે ॥ ૪૯॥

શ્રીમતે નારાયણાય નમઃ, દક્ષિણાં સમર્પયામિ ॥ ૪૯॥

ચન્દ્રાદિત્યૌ ચ ધરણી વિદ્યુદગ્નિસ્તથૈવ ચ ।
ત્વમેવ સર્વ જ્યોતીંષિ આર્તિક્યં પ્રતિગૃહ્યતામ્ ॥ ૫૦॥

શ્રીમતે નારાયણાય નમઃ, આર્તિક્યં સમર્પયામિ ॥ ૫૦॥

કદલી ગર્ભ સમ્ભૂતં કર્પૂરં ચ પ્રદીપિતમ્ ।
આરાર્તિક્યમહં કુર્વે પશ્ય મે વરદો ભવ ॥ ૫૧॥

શ્રીમતે નારાયણાય નમઃ, કર્પૂરાર્તિક્યં સમર્પયામિ ॥ ૫૧॥

નાના સુગન્ધિ પુષ્પાણિ યથા કાલોદ્ભવાનિ ચ ।
પુષ્પાઞ્જલિર્મયા દત્તો ગૃહાણ પરમેશ્વર ॥ ૫૨॥

શ્રીમતે નારાયણાય નમઃ, પુષ્પાઞ્જલિં સમર્પયામિ ॥ ૫૨॥

યાનિ કાનિ ચ પાપાનિ જન્માન્તર કૃતાનિ ચ ।
તાનિ સર્વાણિ નશ્યન્તુ પ્રદક્ષિણ પદે પદે ॥ ૫૩॥

શ્રીમતે નારાયણાય નમઃ, પ્રદક્ષિણાં સમર્પયામિ ॥ ૫૩॥

યસ્ય સ્મૃત્યા ચ નામોક્ત્યા, તપો યજ્ઞ ક્રિયાદિષુ ।
ન્યૂનં સમ્પૂર્ણતાં યાતિ સદ્યો વન્દે તમચ્યુતમ્ ॥ ૫૪॥

આવાહનં ન જાનામિ ન જાનામિ વિસર્જનમ્ ।
પૂજાં ચૈવ ન જાનામિ ક્ષમ્યતાં પરમેશ્વર ॥ ૫૫॥

શ્રીમતે નારાયણાય નમઃ, ક્ષમા પ્રાર્થનાં સમર્પયામિ ॥ ૫૫॥

યં બ્રહ્મા વરુણેન્દ્ર રુદ્ર મરુતઃ સ્તુન્વન્તિ દિવ્યૈસ્તવૈ-
ર્વેદૈઃ સાઙ્ગપદક્રમોપનિષદૈ-ર્ગાયન્તિ યં સામગાઃ ।
ધ્યાનાવસ્થિત તદ્ગતેન મનસા પશ્યન્તિ યં યોગિનો
યસ્યાન્તં ન વિદુઃ સુરાસુરગણાઃ દેવાય તસ્મૈ નમઃ ॥ ૫૬॥

સ શઙ્ખ ચક્રં સ કિરીટ કુણ્ડલં સપીત વસ્ત્રં સરસીરુહેક્ષણમ્ ।
સ હાર વક્ષસ્થલ કૌસ્તુભ શ્રિયં, નમામિ વિષ્ણું શિરસા ચતુર્ભુજમ્ ॥ ૫૭॥

શ્રીમતે નારાયણાય નમઃ, સ્તુતિં સમર્પયામિ ॥ ૫૭॥

નમોસ્ત્વનન્તાય સહસ્રમૂર્તયે સહસ્ર પાદાક્ષિ શિરોરુ બાહવે ।
સહસ્ર નામ્ને પુરુષાય શાશ્વતે સહસ્ર કોટિ યુગધારિણે નમઃ ॥ ૫૮॥

શ્રીમતે નારાયણાય નમઃ, સાષ્ટાઙ્ગ પ્રણામં સમર્પયામિ ॥ ૫૮॥

ગચ્છન્તુ ચ સુરશ્રેષ્ઠાઃ સ્વસ્થાનં પરમેશ્વરાઃ ।
યજમાન હિતાર્થાય પુનરાગમનાય ચ ॥ ૫૯॥

શ્રીમતે નારાયણાય નમઃ, વિસર્જનં સમર્પયામિ ॥ ૫૯॥

અનયા પૂજા શ્રીમન્નારાયણઃ પ્રીયતાં ન મમ । ઇતિ પૂજનમ્ ।

## અથ તન્ત્રોક્ત મુદ્રા નિર્માણ પ્રકારઃ

કુમ્ભમુદ્રાલક્ષણં
દક્ષાઙ્ગુષ્ઠં પુરાઙ્ગુષ્ઠે ક્ષિપ્ત્વા હસ્તદ્વયેન ચ ।
સાવકાશાં મુષ્ટિકાં ચ કુર્યાત્ સા કુમ્ભ મુદ્રિકા ॥ ૧॥

અસ્ત્રમુદ્રાલક્ષણં
દક્ષસ્ય તર્જની મધ્યે સવ્યે કર તલે ક્ષિપેત્ ।
અભિઘાતેન શબ્દઃ સ્યાદસ્ત્ર મુદ્રા સમીરિતા ॥ ૨॥

અઙ્ગ ન્યાસમુદ્રાલક્ષણં
હૃન્નેત્રં ત્રિભિરાખ્યાતં દ્વાભ્યામસ્ત્ર શિરોમતમ્ ।
અઙ્ગુષ્ઠેન શિખા જ્ઞેયા દિગ્ભિઃ કવચમીરિતમ્ ॥ ૩॥

આવાહનમુદ્રાલક્ષણં
હસ્તાભ્યામઞ્જલિં બધ્વાનામિકા મૂલ પર્વણોઃ ।
અઙ્ગુષ્ઠૌ નિક્ષિપેત્સેયં મુદ્રા ત્વાવાહની સ્મૃતા ॥ ૪॥

ગન્ધમુદ્રાલક્ષણં
મધ્યમાનામિકાઙ્ગુષ્ઠૈરઙ્ગુલ્યગ્રેણ ભો પ્રિયે ।
દદ્યાચ્ચ વિમલં ગન્ધં મૂલમન્ત્રેણ સાધકઃ ॥ ૫॥

પુષ્પમુદ્રાલક્ષણં
અઙ્ગુષ્ઠ તર્જનીભ્યાઞ્ચ પુષ્પચક્રે નિવેદયેત્ ॥ ૬॥

ધૂપમુદ્રાલક્ષણં
મધ્યમાનામિકાભ્યાં તુ મધ્ય પર્વણિ દેશિકઃ ।
અઙ્ગુષ્ઠાગ્રેણ દેવેશિ ધૃત્વા ધૂપં નિવેદયેત્ ॥ ૭॥

નૈવેદ્યમુદ્રાલક્ષણં

ઉત્તોલનં ત્રિધા કૃત્વા ગાયત્ર્યા મૂલ યોગતઃ ।
તત્ત્વાખ્ય મુદ્રયા દેવિ નૈવેદ્યં વિનિવેદયેત્ ॥ ૮॥

ગરુડમુદ્રાલક્ષણં
મિથસ્તર્જનીકે શ્લિષ્ટે શ્લિષ્ટાવઙ્ગુષ્ઠકૌ તથા ।
મધ્યમાનામિકે તુ દ્વૌ પક્ષાવિવ વિચાલયેત્ ॥

એષા ગરુડમુદ્રા સ્યાદ્વિષ્ણોઃ સન્તોષ વર્ધિની ॥ ૯॥

પ્રાર્થનામુદ્રાલક્ષણં
પ્રસૃતાઙ્ગુલિકૌ હસ્તૌ મિથઃ શ્લિષ્ટૌ ચ સન્મુખૌ ।
કુર્યાત્ સ્વે હૃદયે સેયં મુદ્રા પ્રાર્થન સંજ્ઞિકા ॥ ૧૦॥

દહનમુદ્રાલક્ષણં
દક્ષે કરતલે રક્ત પઙ્કજે ભાસ્કરં સ્મરન્ ।
દ્રવ્યાણિ સંસ્પૃશેત્તેન મુદ્રૈષા દહનાત્મિકા ॥ ૧૧॥

આપ્યાયનમુદ્રાલક્ષણં
વામ હસ્ત તલે શ્વેત પઙ્કજે શશિનં સ્મરન્ ।
દ્રવ્યાણિ સંસ્પૃશેત્તેન મુદ્રૈષાપ્યાયનાત્મિકા ॥ ૧૨॥

ચક્રમુદ્રાલક્ષણં
સ્પષ્ટૌ પ્રસારિતૌ હસ્તૌ પરસ્પર નિયોજિતૌ ।
ભ્રમણાચ્ચક્રવત્તૌ તુ ચક્ર મુદ્રેતિ કીર્તિતા ॥ ૧૩॥

## અથ પુરુષ સૂક્ત પાઠ વિધિઃ

અથ પુત્રકામઃ શુચિઃ પ્રયતઃ શુક્લામ્બરધરઃ શ્રીચૂર્ણયુક્તઃ દ્વાદશ શ્વેતોર્ધ્વ-પુણ્ડ્રધરઃ પદ્માક્ષ તુલસી માલા ધરઃ શુદ્ધાસનાસીનો ન્યાસાદિકં કૃત્વા અહરહઃ ષોડશ પુરુષ સૂક્તં પઠેત્ । પ્રણવઃ પ્રાક્ યુઞ્જીત । (યાજ્ઞવલ્ક્ય શિક્ષા, ૧/૨૭)
સ્વસ્થઃ પ્રશાન્તો નિર્ભીતો વર્ણાનુચ્ચારયેત્ બુધઃ ।
નાભ્યા હન્યાન્ન નિર્હન્યન્ન ગાયેનૈવ કમ્પયેત્ ॥ ૨૧॥

સમમુચ્ચારયેદ્વર્ણાન્ હસ્તેન ચ મુખેન ચ ॥ ૨૩॥

હસ્ત ભ્રષ્ટઃ સ્વરભ્રષ્ટો ન વેદ ફલમશ્નુતે ॥ ૨૪॥

શઙ્કિતં ભીતમુદ્ઘૃષ્ટમવ્યક્તમનુનાસિકમ્ ॥ ૨૬॥

કાકસ્વરં મૂર્ધ્નિ ગતં તથા સ્થાન વિવર્જિતમ્ ।
વિસ્વરં વિરસઞ્ચૈવ વિશ્લિષ્ટં વિષમાહતામ્ ॥ ૨૭॥

વ્યાકુલં તાલુ હીનં ચ પાઠ દોષાશ્ચતુર્દશ ॥ ૨૮॥

હસ્ત હીનં તુ યોઽધીતે સ્વર વર્ણ વિવર્જિતમ્ ।
ઋગ્યજુસ્સામભિર્દગ્ધો વિયોનિમુપગચ્છતિ ॥ ૪૦॥

સ્વરહીનં તુ યોઽધીતે મન્ત્રં વેદવિદો વિદુઃ ।
ન સાધયતિ યજૂંષિ ભુક્તમવ્યઞ્જનં યથા ॥ ૪૧॥

જ્ઞાતવ્યશ્ચ તથૈવાર્થો વેદાનાં કર્મ સિદ્ધયે ।
પાઠ માત્રાવસાનસ્તુ પઙ્કે ગૌરિવ સીદતિ ॥ ૪૩॥

(યાજ્ઞવલ્ક્ય શિક્ષા)
ગીતી શીઘ્રી શિરઃ કમ્પી યથા લિખિત પાઠકઃ ।
અનર્થોઽલ્પ કણ્ઠશ્ચ ષડેતે પાઠકાધમાઃ ॥ ૩૨॥

માધુર્યમક્ષર વ્યક્તિઃ પદચ્છેદસ્તુ સુસ્વરઃ ।
ધૈર્યં લય સમત્વં ચ ષડેતે પાઠકા ગુણાઃ ॥ ૩૩॥

(પાણિનીય શિક્ષા)
જપે હોમે મખે શ્રાદ્ધે ઽભિષેકે પિતૃ કર્મણિ ।
હસ્ત સ્વરં ન કુર્વીત સન્ધ્યાદૌ દેવ પૂજને ॥

ઉપસ્થાને જપે હોમે માર્જને યજ્ઞ કર્મણિ । કણ્ઠ સ્વરં પ્રકુર્વીત હસ્ત સ્વર વિવર્જિતમ્ । (આહ્નિક સૂત્ર)

## અથ શુક્લ યજુર્વેદ વર્ણનમ્

મન્ત્ર બ્રાહ્મણયોર્વેદ નામધેયં તસ્મિઞ્છુક્લે યાજુષામ્નાયે માધ્યન્દિનીયકે મન્ત્રે સ્વર પ્રક્રિયા । (કાત્યાયન પરિશિષ્ટ પ્રતિજ્ઞા સૂત્ર, ૧)
ૐ મણ્ડલં દક્ષિણમક્ષિ હૃદયં ચાધિતિષ્ઠિતં યેન શુક્લાનિ યજૂંષિ ભગવાન્ યાજ્ઞવલ્ક્યો યતઃ પ્રાપ્તં વિવસ્વન્તં ત્રયીમયમર્ચિષન્તમભિધ્યાય માધ્યન્દિનીયે વાજસનેયકે યજુર્વેદામ્નાયે સર્વે સ ખિલે સ શુક્રિય ઋષિ દૈવત છન્દાંસ્યનુક્રમિષ્યામઃ ॥ (૧)
ઇષેત્વાદિ શુક્લાનિ યજૂંષિ વાજસનેયેન યાજ્ઞવલ્ક્યેનાખ્યાયને । (બૃહદારણ્યક ઉપનિષદ્, ૬/૬/૫)
ઈશાવાસ્ય-બૃહદારણ્ય-જાબાલ-પરમહંસ-સુબાલ-મન્ત્રિકા-નિરાલમ્બ-ત્રિશિખો-બ્રાહ્મણ-મણ્ડલ બ્રાહ્મણા-દ્વયતારક -પૈઙ્ગલ-ભિક્ષુ-તુરીયાતીતા-ધ્યાત્મ-તારસાર-યાજ્ઞવલ્ક્ય-શાટ્યાયની-મુક્તિકાનાં શુક્લ યજુર્વેદ ગતાના -મેકોનવિંશતિ સઙ્ખ્યકાનામુપનિષદાં પૂર્ણમદ ઇતિ શાન્તિઃ । (મુક્તિકોપનિષદ્, ૧/૨/૨)

અયાત-યામાનિ તુ ભાનુ  ગુમાન્યન્યાનિ જાતાન્યતિ નીરસાનિ ।
યજૂંષિ તેષામથ યાજ્ઞવલ્ક્યો હ્યયાત -યામાનિ રવે રવાપ । (દેવી ભાગવત પુરાણ)
શક્ર સોમાનિ રુદ્રાશ્ચ વિશ્વેદેવા-સ્ત્રિલોચનઃ ।
વિધાતા શઙ્ખ પાણિશ્ચ તથા સપ્તર્ષયોઽમલાઃ ॥ (વાયુ પુરાણ)
મૃકણ્ડ કપિલ વ્યાસ યાજ્ઞવલ્ક્ય પરાશરાઃ ।
વાલ્મીકિર્નારદોઽગસ્ત્ય ઇત્યેતે વાજશાખિનઃ ॥

વાજિવિપ્ર વિશેષેણ શ્રાદ્ધ કર્મ નિરન્તરમ્ । શુક્લાઃ પ્રશસ્તાઃ કૃષ્ણસ્તુ યજુરુક્ત નિષેધતઃ । (હોલિ ભાષ્ય)
તસ્માત્ કવ્યાનિ હવ્યાનિ દાતવ્યાનિ દ્વિજાતયે ।
વાજિને દત્તમેકં તુ તત્ કોટિ ગુણિતં ભવેત્ ॥

યજુર્વેદ મહા કલ્પ તરોરેકોત્તરં શતમ્ । શાખાસ્તત્ર શિખાકારા દશગ્ચાથ શુક્લગાઃ । (બૃહન્નારદીય પુરાણ)
તત્રાપિ મુખ્ય વિજ્ઞેયં શાખા માધ્યન્દિનો યજુઃ ॥ માધ્યન્દિની તુ યા શાખા સર્વસાધારિણી હિ સા ॥

તામેવ ચ પુરસ્કૃત્ય વસિષ્ઠેન પ્રભાષિતમ્ । (કલ્પદ્રુમ)
યજુર્વેદસ્ય મૂલં હિ ભેદો માધ્યન્દિનીયકઃ ।
સર્વાનુક્રમણી તસ્યાઃ કાત્યાયન કૃતા તુ યા ॥ (હોલિ ભાષ્ય)
માધ્યન્દિન યજુર્વેદે ખં બ્રહ્માન્તમુદાહૃતમ્ ।
તારપૂર્વં હિ ત્રિગુણં નાન્ય શાખાસુ મુખ્યતઃ ॥ (ગુહ્યમાલા)
સમાપ્યચોત્તરાદિ-ર્યન્મન્ત્ર બ્રાહ્મણયોર્દ્વિજાઃ ।
ૐ ખં બ્રહ્મેતિ યો ધ્યાયન્ દર્શકશ્ચોપવેધસઃ ॥ (પરાશર સ્મૃતિ)
ઓઙ્કારસ્ત્રિગુણઃ પ્રોક્તઃ ખં બ્રહ્મ ત્રિગુણં તથા ।
માધ્યન્દિનીય શાખાનાં યજુર્વેદે પઠન્તિ હિ ॥

શુક્લ કૃષ્ણમિતિ દ્વેધા યજુશ્ચ સમુદાહૃતમ્ ।
શુક્લં વાજસનેયં તુ કૃષ્ણં સ્યાત્તૈત્તિરીયકમ્ ॥ (પ્રતિજ્ઞા સૂત્ર ભાષ્ય)
બુદ્ધિમાલિન્ય હેતુત્વાત્તદ્યજુઃ કૃષ્ણમીર્યતે ।
વ્યવસ્થિત પ્રકરણાત્તદ્યજુઃ શુક્લમીર્યતે ॥

## અષ્ટવિધ વેદ પાઠઃ

જટા માલા શિખા રેખા ધ્વજો દણ્ડો રથો ઘનઃ ।
અષ્ટૌ વિકૃતયઃ પ્રોક્તાઃ ક્રમપૂર્વા મહર્ષિભિઃ ॥ (યાજ્ઞવલ્ક્ય શિક્ષાસૂત્ર)
અનુલોમ વિલોમાભ્યાં ત્રિવારં હિ પઠેત્ ક્રમઃ ।
વિલોમે પદવત્ સન્ધિરનુલોમે યથા ક્રમમ્ ॥

બ્રૂયાત્ ક્રમ વિપર્યાસા વર્ધર્ચસ્યા દિતોઽન્તતઃ ।
અન્તં ચાદિ નયેદેવં ક્રમં માલેતિ કીર્ત્યતે ॥

પાદોત્તરાં શિખામેવ શિખામાર્યાઃ પ્રચક્ષતે ।
ક્રમાદ્ દ્વિ ત્રિ ચતુઃ પઞ્ચ પદ ક્રમમુદાહરેત્ ॥

પૃથક્ પૃથગ્વિપર્યસ્ય લેખામાહુઃ પુનઃ ક્રમાત્ ।
બ્રૂયાદાદેઃ ક્રમં સમ્યગન્તાદુત્તારયેદિતિ ॥

વર્ગે વા ઋચિ વા પત્ર પઠનં સ ધ્વજઃ સ્મૃતઃ ।
ક્રમમુક્ત્વા વિપર્યસ્ય પુનશ્ચ ક્રમમુત્તમમ્ ॥ ।

અર્ધર્ચાદિવમેવોક્તઃ ક્રમ દણ્ડો વિધીયતે ।
પાદશોઽર્ધર્ચશો વાપિ સહોક્ત્યા દણ્ડવદ્રથઃ ॥

અન્ત ક્રમં પઠેત્ પૂર્વમાદિ પર્યન્તમાનયેત્ ।
આદિ ક્રમં નયેદન્તં ઘનમાહુર્મનીષિણઃ ॥ ઇતિ ॥

## અથ માધ્યન્દિની શાખા પ્રશંસા

સન્મૂલો યજુરાખ્ય વેદ-વિટપી જીયાત્સા માધ્યન્દિનિઃ,
શાખા યત્ર યુગેન્દુ-કાણ્ડ સહિતા યત્રાસ્તિ સા સંહિતા ।
યત્રાભ્રાબ્ધિ લતા વિભાન્તિ શર શૈલાઙ્કેન્દુભી ઋગ્દલૈઃ,
પઞ્ચદ્વીષુ નભોઽઙ્ક વર્ણ મધુપૈઃ ખાઞ્ચર્ક ગુઙ્ગુઞ્જિતૈઃ ॥

## અથ પુત્રાર્થ વિભાણ્ડક ચરુ વિધિઃ

અથાતઃ સમ્પ્રવક્ષ્યામિ વિધિં પાવનમુત્તમમ્ ।
અસ્માત્તાતસ્ય તાતોઽયં રઘુ પૌત્રાય ધીમતે ॥

(બૃહત્ પારાશર સ્મૃતિ, ૯/૨૮૯)
અનપત્યસ્ય પુત્રાર્થં કુર્યાદ્વૈ ભાણ્ડિકસ્તુ યમ્ ।
સહસ્રશીર્ષ સૂક્તસ્ય વિધાનં ચરુ પાક કૃત્ ॥ ૨૯૦॥

યૈર્યૈર્નૃપૈઃ કૃતં પૂર્વમન્યૈરપિ દ્વિજોત્તમૈઃ ।
સિદ્ધ્યન્તિ સર્વ મન્ત્રાણિ વિધિવિદ્ભિર્દ્વિજોત્તમૈઃ ॥ ૨૯૧॥

ઉપાસિતાનિ સદ્ ભક્ત્યા શ્રોત્રિયૈઃ શ્રુતિ પારગૈઃ ।
આત્મવિદ્ધિ નિરાહારૈ-ર્વૈદિભિ-ર્મન્ત્રવિત્તમૈઃ ॥ ૨૯૨॥

ક્રિયમાણાઃ ક્રિયાઃ સર્વાઃ સિદ્ધ્યન્તિ બ્રહ્મચારિભિઃ ।
ન પાઠાન્ન ધનાત્ સ્નાના-ન્નાત્મનઃ પ્રતિપાદનાત્ ॥ ૨૯૩॥

પ્રાક્તનાત્ કર્મણઃ પુંસાં સર્વા ભવન્તિ સિદ્ધયઃ ।
શુક્લ પક્ષે શુભે વારે શુભ નક્ષત્ર ગોચરે ॥ ૨૯૪॥

દ્વાદશ્યાં પુત્ર કામાય ચરું કુર્વીત વૈષ્ણવમ્ ।
દમ્પત્યોરુપવાસશ્ચ હ્યેકાદશ્યાં સુરાલયે ॥ ૨૯૫॥

મન્ત્રૈઃ ષોડશભિઃ સમ્યગર્ચયિત્વા જનાર્દનમ્ ।
ચરું પુરુષ સૂક્તેન શ્રપયેત્ પુત્ર કામ્યયા ॥ ૨૯૬॥

પ્રાપ્નુયાદ્વૈષ્ણવં પુત્રં ચિરાયુઃ સન્તતિ ક્ષમમ્ ।
દ્વાદશીં દ્વાદશી સમ્યગ્વિધિવન્નિર્વપેચ્ચરુમ્ ॥ ૨૯૭॥

યઃ કરોતિ ઇહોપાસ્તિં વિષ્ણોસ્તુ પરમં પદમ્ ।
હુત્વાજ્યં વિધિવત્ પૂર્વમગ્નૌ ષોડશભિસ્તતઃ ॥ ૨૯૮॥

સમિધોઽશ્વત્થ વૃક્ષસ્ય હુત્વાજ્યં જુહુયાત્ પુનઃ ।
ઉપસ્થાનં તતઃ કૃત્વા ધ્યાત્વા ચ મધુસૂદનમ્ ॥ ૨૯૯॥

હવિર્હોમં પુનઃ કૃત્વા જુહુયાચ્ચ ઘૃતાહુતીઃ ।
હવિશેષં નમસ્કૃત્ય નારી નારાયણં પ્રતિ ॥ ૩૦૦॥

સમ્પ્રાશ્ય ચ હવિઃ શેષં લબ્ધ્વાશીશ્ચ વસેદ્ ગૃહે ।
તતઃ કૃત્વા ત્વિદં કર્મ કર્ત્તવ્યં દ્વિજ તર્પણમ્ ॥ ૩૦૧॥

અસૂતા મૃત પુત્રા ચ યા ચ કન્યાઃ પ્રસૂયતે ।
ક્ષિપ્રં સા જનયેત્ પુત્રં પારાશર વચો યથા ॥ ૩૦૨॥

હોમાન્તે દક્ષિણાં દદ્યાદ્ધેનું વાસસ્તથા તિલાન્ ।
ભૂમિં હિરણ્ય રત્નાનિ યથા સમ્ભવમેવ ચ ॥ ૩૦૩॥

ય સિદ્ધ મન્ત્રે સતતં દ્વિજેન્દ્રાઃ સમ્પૂજ્ય વિષ્ણું વિધિવત્ સુતાર્થી ।
ઇદં વિધાનં વિદધાતિ સમ્યક્ સ પુત્રમાપ્નોતિ હરેઃ પ્રસાદાત્ ॥ ૩૦૪॥ ઇતિ ॥

## અથ ઋષ્યશૃઙ્ગોક્ત સન્તાન યાગઃ

ઋષય ઊચુઃ-સૂત સૂત મહાપ્રાજ્ઞ સર્વશાસ્ત્ર વિશારદ ।
સન્તાન યાગં નો બ્રૂહિ કો વિધિસ્તત્ર કિં ફલમ્ ॥ ૧॥

સૂત ઉવાચ-શૃણુધ્વં ઋષયઃ સર્વે પુંસૂક્ત વિધિમાદરાત્ ।
પૂર્વં સનત્કુમારેણ પૃષ્ટો વિષ્ણુઃ સનાતનઃ ॥ ૨॥

ઉક્તવાન્ પૌરુષં હોમ વિધાનં પુત્ર સત્ફલમ્ ।
વસિષ્ઠાયોદિતં તેન ચાત્રેયં સોઽબ્રવીદિદમ્ ॥ ૩॥

બોધનાય તેનોક્તં સ સ્વશિષ્યેભ્ય ઉક્તવાન્ ।
વક્ષ્યામિ તદહં સમ્યક્ શૃણુધ્વં મુનિસત્તમાઃ ॥ ૪॥

પુત્રપ્રદમપુત્રાણાં જયદં જય કામિનમ્ ।
શ્રીદં શ્રીકામિનાં પુંસાં રાજ્યદં રાજ્ય કામિનામ્ ॥ ૫॥

ધાન્યદં ધાન્ય કામાનાં કીર્ત્તિદં કીર્ત્તિ કામિનામ્ ।
મુક્તિદં મુક્તિ કામાનાં મોક્ષદં મોક્ષ કામિનામ્ ॥ ૬॥

બહુના કિમિહોક્તેન સર્વ સિદ્ધિપ્રદં નૃણામ્ ।
યે કુર્વન્તિ નરઃ શ્રેષ્ઠાઃ પુંસૂક્તં હવનં તતઃ ॥ ૭॥

સન્તાન ફલદં નૃણાં તેષાં શ્રી ભૂમિ સંયુતમ્ ।
સન્તુષ્ટો ભગવાન્ વિષ્ણુઃ ધર શાર્ઙ્ગ ગદાબ્જભૃત્ ॥ ૮॥

દદાતિ સ તનૂજા વૈ સ્વતુલ્યાનચિરેણ સઃ ।
યદ્યદિચ્છન્તિ મનુજાઃ તત્તન્નૂનમવાપ્નુયુઃ ॥ ૯॥

ઋષય ઊચુઃ-વ્યાસ શિષ્ય મહાબાહો સૂત તત્ત્વાર્થવિત્તમ ।
વિધાનં કર્મણો બ્રૂહિ પુંસૂક્ત હવનસ્ય ભો ॥ ૧૦॥

એવમુક્તો મુનિગણૈઃ વિધિં સૂત ઉદાહરત્ ।
આરભ્ય શુક્લ પ્રથમાં કૃષ્ણ પ્રતિપદન્તતઃ ॥ ૧૧॥

ષોડશશ્ચાપિ ઘસ્રેષુ ચૈકૈકસ્મિન્ સહસ્રકમ્ ।
પાયસૈર્જુહુયુર્વિપ્રાઃ વિત્ત શાઠ્ય વિવર્જિતાઃ ॥ ૧૨॥

પુંસૂક્તોક્તાભિરેતાભિઃ ઋગ્ભિઃ ષોડશભિસ્તતઃ ।
બ્રાહ્મણાન્ ભોજયેત્ પશ્ચાત્ યથા વિધિ વિધાનતઃ ॥ ૧૩॥

સન્તાનં વિષ્ણુ સદૃશમવાપ્નુયાદચિરેણ વૈ ।
તાવદ્ધોમ ક્રિયાશક્તૌ દ્વાદશાહં હુવેદ્ વ્રતી ॥ ૧૪॥

તદશક્તો ષડ્દિનં વા વિત્ત શાઠ્યં ન કારયેત્ ।
ઉત્તમં ષોડશ દિનં દ્વાદશાહં તુ મધ્યમમ્ ॥ ૧૫॥

અધમં ષડહં પ્રોક્તં શક્તૌ કુર્યાત્ ક્રિયોત્તમમ્ ।
શક્તૌ સત્યાન્તુ યો મૂઢઃ કારયેન્ મધ્યમાધમૌ ॥ ૧૬॥

નાવાપ્નોતિ સ સન્તાનં વિષ્ણુ પ્રીતિં ન સંશયઃ ।
તસ્માત્ સર્વ પ્રયત્નેન કારયેત્ ઉત્તમં સુધીઃ ॥ ૧૭॥

હોમાશક્તૌ જપેત્તાવત્ તદશક્તૌ સકૃદ્ધનેત્ ।
વિષ્ણુ ઋક્ષે વા માસિ દ્વાદશ્યાં સિત કૃષ્ણયોઃ ॥ ૧૮॥

યદા કદા વા પું યજ્ઞે માનસં વૈ પ્રવર્તતે ।
તદારભ્ય દિનેષ્વેષુ ષોડશેષ્વપિ તં યજેત્ ॥ ૧૯॥

દ્વાદશ્યાં વા યથા વિષ્ણુ તારે વા ષોડશં દિનમ્ ।
ભવેત્તથા પું હવનં આરભેત વિચક્ષણઃ ॥ ૨૦॥

વિશેષતો ગર્ભ ચિહ્ને સમ્પ્રાપ્તે તુ તૃતીયકે ।
માસિ ષોડશ ઘસ્રેષુ કુર્યાત્ પું હવનં બુધઃ ॥ ૨૧॥

એવં કુર્યાચ્ચતુર્થે વા પઞ્ચમે માસિ વા તતઃ ।
મહા વિષ્ણુ પ્રસાદેન પુત્ર પ્રાપ્તિર્ભવેદ્ ધ્રુવમ્ ॥ ૨૨॥

ઊર્ધ્વં ન કુર્યાદ્ ગર્ભસ્થ શિશો સ્ત્રી પુંસ લક્ષણાત્ ।
તતઃ પરં કૃતાદ્ધોમાત્ શિશોરાયુષ્ય ધીર્ગુણાઃ ॥ ૨૩॥

ભવેયુઃ સર્વ માસેષુ કુર્યાત્ પું સૂક્ત હોમકમ્ ।
સ્ત્રી જન્મ વા પુત્ર જનિર્યથા ચિહ્નં તથા ભવેત્ ॥ ૨૪॥

સા પ્રજાયુષ્ય ધૈર્યાદિ સર્વ લક્ષણ સંયુતા ।
એતત્ પું હવનાત્ પૂર્વમાચાર્યાત્ પુત્ર સિદ્ધયે ॥ ૨૫॥

સન્તાન ગોપાલકાખ્યં વા મન્ત્રં સ્વીકૃત્ય ચારભેત્ ।
આચાર્ય સોમયાજી ચેત્ શ્રોત્રિયો વાપિ કર્મઠઃ ॥ ૨૬॥

વૃદ્ધો વા વયસા હીનઃ સ એવાચાર્યકો ભવેત્ ।
ઇત્થં ષોડશ ઘસ્રેષુ ગતેષુ ચ તતઃ પરમ્ ॥ ૨૭॥

યાવત્ પઞ્ચમ માસં વૈ તાવદભ્યર્ચ્ય કેશવમ્ ।
નવનીત મયે યન્ત્રે નિત્યં સાષ્ટ સહસ્રકમ્ ॥ ૨૮॥

જપિત્વા પ્રાશયેત્ સદ્યો ગર્ભિણી સુતમાપ્નુયાત્ ।
જપેત્તતઃ પરમપિ ગર્ભસ્થ તનયસ્ય હિ ॥ ૨૯॥

કુર્યાત્ પ્રજ્ઞાદિ વૃદ્ધ્યાર્થમાસૃતિ દ્વિજ સત્તમાઃ ।
ત્રિરસા વૃત્તિ સહિતં જપં કુર્યાત્ દિને દિને ॥ ૩૦॥

પ્રાતઃ સ્નાનાદિકં કૃત્વા ધ્યાત્વા મનસિ માધવમ્ ।
ગણેશમાદૌ સમ્પૂજ્ય પ્રત્યૂહસ્યોપશાન્તયે ॥ ૩૧॥

બ્રાહ્મણાનામનુજ્ઞાં ચ કૃત્વા કર્મ સમાચરેત્ ।
અનુજ્ઞાયાં ષોડશ વા દ્વાદશાષ્ટૌ ચ વાપિ ષટ્ ॥ ૩૨॥

ગૃહીત્વા ચતુરો વા કૃચ્છ્રન્તસ્યાર્ધકં પુનઃ ।
દદ્યાદાચાર્યવર્યાય હ્યર્થમન્યદ્ દ્વિજન્મનમ્ ॥ ૩૩॥

સઙ્કુલ્પ્ય કામાન્વિવિધાન્ મનો-વાક્કાયકાનપિ ।
પુણ્યાહં તુ તતઃ કૃત્વા હ્યાચાર્યં વૃણુયાત્ તતઃ।૩૪॥

સ્વકર્મ નિરતં શાન્તં શ્રોત્રિયં કર્મ કોવિદમ્ ।
સન્તુષ્ટ માનસં સમ્યક્ દરિદ્રઞ્ચ કુટુમ્બિનમ્ ॥ ૩૫॥

સોમયાજ્યુત્તમઃ પ્રોક્તઃ તદલાભે પુરોક્તકઃ ।
દુકૂલ વસ્ત્ર યુગલં દક્ષિણા કુણ્ડલાદિભિઃ ॥ ૩૬॥

આચાર્યં પૂર્વમભ્યર્ચ્ય વૃણુયાદ્દર્ભ દાનતઃ ।
તેનૈવ કારયેત્ કર્મ પું સૂક્ત હવનાદિકમ્ ॥ ૩૭॥

કર્મ ધ્યાનમના ભૂત્વા હ્યાચાર્ય વશગો ગૃહી ।
આચાર્યો યજમાનેન યુક્તઃ ષડ્ભિરથાષ્ટભિઃ ॥ ૩૮॥

ચતુર્ભિર્વાથ ઋત્વિભિઃ પું હવં કર્મ ચારભેત્ ।
સઙ્કુલ્પમાદૌ કુર્વીત કલશાચાર્યાદિકં તતઃ ॥ ૩૯॥

સ્વગૃહ્યોક્ત વિધાનેન કુર્યાદાચાર્ય ગૃહ્યતઃ ।
ઉલ્લેખન પ્રણીતાન્તં કૃત્વા કર્મ તતઃ પરમ્ ॥ ૪૦॥

તતઃ પુરુષ સૂક્તેન ન્યસિત્વા સ્વ શરીરકે ।

હોમ કુણ્ડ પુરો ભાગે કુમ્ભે વિષ્ણું સમર્ચયેત્ ॥ ૪૧॥

દ્રોણ દ્વયમિતં ધાન્યં તદર્ધં તણ્ડુલં તતઃ ।
માષાન્ તદર્ધં તસ્માદર્ધં તિલાત્તત્ર લિખેત્ કજમ્ ॥ ૪૨॥

ઉપર્યુપરિ નિક્ષિપ્ય ક્રમાત્તત્ર ઘટં ન્યસેત્ ।
દ્રોણ દ્વયમિતં કુમ્ભં ત્રયુતાન્તમયં તુ વા ॥ ૪૩॥

પઞ્ચ પલ્લવ તત્વાદ્યૈર્નારિકેલ ફલેન ચ ।
દશ હસ્ત પ્રમાણેન દુકૂલેન ચ વેષ્ટયેત્ ॥ ૪૪॥

નિધાય પ્રતિમાં તત્ર દશ નિષ્ક સુવર્ણતઃ ।
નિષ્ક સ્વર્ણ કૃતાં વાપિ ચતુર્હસ્તાં મનોહરામ્ ॥ ૪૫॥

વિષ્ણુરૂપાં ચ નિર્માય શ્રી રૂપાજ્ય દ્વિબાહુકામ્ ।
યા ચાન્વિતા કુમ્ભે વૈ નિધાય પૃથગર્ચયેત્ ॥ ૪૬॥

પૃથક્ પૂજા ક્રિયા શક્ત્યા વૈકસ્મિન્વાર્શ્રિયાજ્યયા ।
સહિતં વિષ્ણુમભ્યર્ચ્ય ઋગ્ભિઃ ષોડશભિઃ ક્રમાત્ ॥ ૪૭॥

પૃથક્ કૃતાયાં પૂજાયાં તત્ર ભૂ પૂજનં ન હિ ।
શ્રી સૂક્તેન શ્રિયાઃ પૂજાં કુર્યાત્ સન્તાન સિદ્ધયે ॥ ૪૮॥

યજમાનં સપત્નીકં સંહૃત્યુત્પત્તિ સંસ્થિતીન્ ।
ન્યાસાન્ પુરુષ સૂક્તેન ષોડશાર્ચેન વૈ દ્વિજાઃ ॥ ૪૯॥

ઋષય ઊચુઃ-સૂત ન્યાસ વિધિં ન્યાસ વિધાનં ચ વદ પ્રભો ॥ ૫૦॥

સૂત ઉવાચ-અસ્ય શ્રી ષોડશર્ચસ્ય પું સૂક્તસ્ય મહર્ષયઃ ॥ ૫૧॥

અન્તર્યામી ચ ભગવાનૃષિર્નારાયણઃ સ્મૃતઃ ।
છન્દોઽનુષ્ટુબ્ રમા ભૂમિઃ પું વિષ્ણુર્દેવતા મહાન્ ॥ ૫૨॥

બીજં પુરુષ એવેતિ નાન્યઃ પન્થાસ્તતઃ પરમ્ ।
એતાવાન્ કીલકં પ્રોક્તમિષ્ટાર્થે વિનિયોજકઃ ॥ ૫૩॥

અતો દેવા ઇતિ ચ શક્યો જપ્ત્વા તતઃ ક્રમાત્ ।
પુરુષાય મહદ્ બ્રહ્મ વિષ્ણુ રુદ્રાખિલેષુ વૈ ॥ ૫૪॥

પુરુષં યોજયેત્ પશ્ચાત્ ચતુર્થ્યન્તેન વિન્યસેત્ ।
અઙ્ગુષ્ઠાદીન્ હૃદાદીન્ ચ ન્યસિત્વા ધ્યાનમાચરેત્ ॥ ૫૫॥

ગોક્ષીરાભં પુણ્ડરીકાક્ષં ચક્રાબ્જાભ્યાં શઙ્ખ કૌમોદકીભ્યામ્ ।
શ્રી ભૂમિભ્યામર્ચિતં યોગ પીઠે ધ્યાયેદ્દેવં પૂજયેત્ પૌરુષેણ ॥ ૫૬॥

ઇતિ ધ્યાત્વા મહાવિષ્ણું તત્પશ્ચાત્ ન્યાસમાચરેત્ ।
વામાઙ્ગુાઘ્રઙ્ગુાચરણ જાનૂરૂ યુગ્મેષુ નાભૌ ।
હૃત્કણ્ઠાં સ દ્વિતય વદના ક્ષુત્તમાઙ્ગેષુ મન્ત્રી ॥ ૫૭॥

પું સૂક્તસ્થૈર્ન્ચસિતુ મનુવિત્ સંહૃતૌ શીર્ષ પૂર્વમ્ ।
સ્પૃષ્ટો નાભિ પ્રભૃતિ હૃદયાન્તં સ્થિતૌ ચ ક્રમેણ ।
ઇતિ ન્યાસ ત્રયં કૃત્વા હ્યાચાર્યસ્યોપદેશતઃ ॥ ૫૮॥

વિતતે કદલી પત્રે સાગ્રે નિમ્નાદિવર્જિતે ।
નવનીતં પ્રસાર્યાથ તત્ર પું સૂક્ત યન્ત્રકમ્ ॥ ૫૯॥

લિખિત્વા તત્ર પુરુષં શ્રી ભૂમિ સહિતં યજેત્ ।
નવનીત મયે યન્ત્રે યજમાનોઽર્ચયેદ્ધરિમ્ ॥ ૬૦॥

પું સૂક્તસ્થૈઃ સુમનુભિઃ ષોડશૈરુપચારકૈઃ ।
ઋષય ઊચુઃ-વ્યાસ દેશિક તદ્યન્ત્રં વિધાનં બ્રૂહિ તત્ત્વતઃ ॥ ૬૧॥

ઇત્યુક્તો મુનિભિઃ સમ્યક્ યન્ત્રં બ્રૂતે મહામુનિઃ ।
શ્રી સૂત ઉવાચ-શ઼ૃણુધ્વં ભો યોગિવર્યા વચ્મિ યન્ત્રં સુતપ્રદમ્ ॥ ૬૨॥

ષટ્કોણ કર્ણિકા મધ્યે તારં સાધ્ય સમન્વિતમ્ ।
સુદર્શન ષડર્ણઞ્ચ ષટ્કોણેષ્વસ્ય સન્ધિષુ ॥ ૬૩॥

તદઙ્ગાનિ ચતુષ્પાત્રે કેશરેષુ ક્રમેણ ચ ।
ગોપાલક ચતુર્વર્ણં મન્ત્રસ્યૈકૈકમક્ષરમ્ ॥ ૬૪॥

દલેષુ દ્વાદશાર્ણસ્ય ત્રીણિ ત્રીણ્યક્ષરાણિ તુ ।
અષ્ટપત્રે કેશરેષુ ચાષ્ટાર્ણે ચૈકમક્ષરમ્ ॥ ૬૫॥

નૃસિંહાનુષ્ટુભો વર્ણાન્ ચતુરશ્ચતુરસ્તથા ।
સુદર્શન દ્વ્યષ્ટ વર્ણાન્ કેશરે ષોડશચ્છદૈઃ ॥ ૬૬॥

ઋચાં પુરુષ સૂક્તસ્ય ક્રમાત્ ષોડશકં બહિઃ ।
માત્રકોર્ણોર્લ્લસદ્ વૃત્તં ભૂપુરાસ્તત્ર તારકમ્ ॥ ૬૭॥

યન્ત્રં પુરુષ સૂક્તસ્ય પુત્રાયુ કીર્તિ વર્દ્ધનમ્ ।
સર્વ પાપ હરં શ્રીદં ધર્માર્થ સુખ મોક્ષદમ્ ॥ ૬૮॥

આદ્યયાવાહયેદ્દેવમાસનં તુ દ્વિતીયયા ।
પાદ્યં તૃતીયયા દદ્યાત્ ચતુર્થ્યાર્ઘ્યં સમાચરેત્ ॥ ૬૯॥

પઞ્ચમ્યાચમનીયં તુ ષષ્ટ્યા સ્નાનં તતઃ પરમ્ ।
સપ્તમ્યા વસ્ત્ર દાનં વૈ ચાષ્ટમ્યા તૂપવીતકમ્ ॥ ૭૦॥

દદ્યાન્નવમ્યા ગન્ધં તુ દશમ્યા પુષ્પમર્પયેત્ ।
એકાદશ્યા તથા ધૂપં દ્વાદશ્યા તુ પ્રદીપકમ્ ॥ ૭૧॥

ત્રયોદશ્યાત્તુ નૈવેદ્યં ચતુર્દશ્યા કુસુમાઞ્જલિમ્ ।
પ્રદક્ષિણં પઞ્ચદશ્યા ષોડશ્યોદ્યાપન ક્રમાત્ ॥ ૭૨॥

પ્રાણ પ્રતિષ્ઠાં યન્ત્રેણ પુરોધાસ્તદનન્તરમ્ ।
અગ્નાવભ્યર્ચયેદ્વિષ્ણું પૂર્વોક્તે નૈવ વર્ત્મના ॥ ૭૩॥

સ્વયં હોમે સ્વ વહ્નિઃ સ્યાદન્ય હોમે તુ લૌકિકઃ ।
તાભિઃ ષોડશભિઃ પૂર્વં હુવેદાજ્યાહુતીઃ ક્રમાત્ ॥ ૭૪॥

પક્વાહુતીસ્તતસ્તાભિઃ અવદાન વિધાનતઃ ।
પુરોડનુવાક્યે નૈવાત્ર જુહુયાત્ સર્પિરાહુતિઃ ॥ ૭૫॥

સમિધો જુહુયાત્તાભિઃ અશ્વત્થાઃ ક્રમશો દ્વિજાઃ ।
એકૈક હોમતઃ પશ્ચાદગ્નેર્દક્ષિણતો દ્વિજાઃ ॥ ૭૬॥

સંસ્થાપ્ય દર્ભાન્ પ્રાગગ્રાન્ એકત્રે નાસનચ્છદાન્ ।
અષ્ટૌ સંસ્થાપ્ય ચાન્યત્ર તથોદગપવર્ગતઃ ॥ ૭૭॥

અશ્વત્થ પત્રમેકૈકં સ્થાપયેદ્ ઋગ્જપઃ ક્રમાત્ ।
તાભિરાજ્યાહુતીઃ કુર્યાત્ એકૈકસ્યા અથાહુતેઃ ॥ ૭૮॥

ક્રમાદશ્વત્થ પત્રેષુ સ દણ્ડેષુ યથાક્રમમ્ ।
તાભિઃ ષોડશભિશ્ચગ્ભિઃ ઉપસ્તીર્યાન્ મહર્ષયઃ ॥ ૭૯॥

હસ્તેન જુહુયાત્ પત્રે હોમમર્ધમતઃ પરમ્ ।
ક્રમાદશ્વત્થ પત્રેષુ નિક્ષિપેત ક્રમાત્ પુનઃ ॥ ૮૦॥

તાભિરાજ્યાહુતીઃ કુર્યાત્ એકૈકસ્યા તથાહુતેઃ ।
પશ્ચાદ્ ક્રમાદ્ ઋગ્ જપઃ પાયસાન્યભિધારયેત્ ॥ ૮૧॥

ચલચ્છપચ્છદૈઃ ચગ્ભિઃ પિધેયાત્ પાયસાન્યથા ।
આચાર્યો યજમાનેન સાર્ધમૃત્વિભિરપ્યથ ॥ ૮૨॥

જુહુયાત્ પાયસં વહ્નૌ અષ્ટોત્તર સહસ્રકમ્ ।
ષષ્ઠ્યા વૃત્ત્યા ઋધિકયા ષોડશાનામૃચાં ક્રમાત્ ॥ ૮૩॥

અષ્ટાધિકં સહસ્રં તુ ભવેત્ સઙ્ખ્યા દ્વિજર્ષભાઃ ।
તતઃ સ્વિષ્ટ કૃતો ભૂત્વા રુદ્રાયાણામથો જપાન્ ॥ ૮૪॥

અભ્યાતાનાં રાષ્ટ્રભૂતઃ પ્રજાપતિમતઃ પરમ્ ।
વ્યસ્તાશ્ચ જયાહુતીર્હુત્વા યદસ્યેતિ ચ મન્ત્રકમ્ ॥ ૮૬॥

અસ્મિન્ કર્મણ્યનાજ્ઞાત પ્રાયશ્ચિત્તાદિકં પુનઃ ।
પૂર્ણાહુતિમથો હુત્વા તદન્તે ગાં સતર્ણકામ્ ॥ ૮૬॥

આચાર્યાય વરં દદ્યાત્ હોમ શેષં સમાપયેત્ ।
પુનઃ પૂજાં ચ નૈવેદ્યં પાયસં મોદકાદિકમ્ ॥ ૮૭॥

પઞ્ચાસ્ય દીપં પશ્ચાત્તુ નીરાજનમતઃ પરમ્ ।
પ્રદક્ષિણા નમસ્કારઃ પ્રાર્થયેદ્ વાઞ્છિતં પુનઃ ॥ ૮૮॥

કુમ્ભાદુદ્વાસયેદ્દેવં યન્ત્રાન્નોદ્વાસયેદ્ધરિમ્ ।
સર્વદા શ્રાવણે માસે પું સૂક્ત હવનં દ્વિજાઃ ॥ ૮૯॥

ઋત્વિગ્ભ્યો દક્ષિણાં દદ્યાત્ યથા શક્તિ તતઃ પરમ્ ।
આચાર્યાય વિશેષેણ ગોદ્વયં વત્સ સંયુતમ્ ॥ ૯૦॥

એકૈકસ્મિન્ દિનેત્યેયં દક્ષિણા દીયતાં બુધૈઃ ।
આચાર્યો યદિ તુષ્ટઃ સ્યાત્ સર્વ શાન્તિર્ભવિષ્યતિ ॥ ૯૧॥

આચાર્ય દક્ષિણા તસ્માદ્ દીયતાં પ્રતિવાસરમ્ ।
કુમ્ભોપકરણં સર્વમાચાર્યાય નિવેદયેત્ ॥ ૯૨॥

હરિ લક્ષ્મી પ્રતિમયોર્નક્તં કુર્યાત્તથાર્ચનમ્ ।
તપ્ત ક્ષીરં તુ નૈવેદ્યં પ્રાશયેદ્દમ્પતી ચ તત્ ॥ ૯૩॥

હોમાન્તે પ્રતિમા યુગ્મં સ વસ્ત્રશ્ચૈવ દક્ષિણામ્ ।
આચાર્યાય સદીપં વૈ દદ્યાત્ સત્પુત્ર સિદ્ધયે ॥ ૯૪॥

એતત્ કર્મ દ્વિધા પ્રોક્તં સમષ્ટિ વ્યષ્ટિ ભેદતઃ ।
સમષ્ટૌ ષોડશિનમેકં કર્મ તથાર્ત્વિજઃ ॥ ૯૫॥

આષોડશિનં કુમ્ભે માઘે ક્ષિપ્તં દિને તુ તત્ ।

કુમ્ભાન્નોદ્વાસયેદ્દેવમુત્થાનં ષોડશે દિને ॥ ૯૬॥

સમ્પાત પ્રાસનં ચાપિ ઋત્વિગાચાર્ય દક્ષિણા ।
અનુજ્ઞા સકૃદેવ સ્યાત્ કુમ્ભ રત્નં ચ તત્સમમ્ ॥ ૯૭॥

ઋત્વિજાં યજમાનસ્ય તત્પત્ન્યા દેશિકસ્ય ચ ।
કર્મ મધ્યે તુ નાશૌચમન્ત એવ તુ તદ્ ભવેત્ ॥ ૯૮॥

વ્યષ્ટૌ પ્રતિદિનં કુર્યાદનુજ્ઞાં ગણ પૂજને ।
એકં કૃચ્છ્રમનુજ્ઞાયાં તદાચાર્યાય દીયતામ્ ॥ ૯૯॥

કુમ્ભરત્નં સ્વર્ણ પુષ્પમૃત્વિગાચાર્ય દક્ષિણામ્ ।
સમ્પાતઃ પ્રાશનં ચાપિ નિત્યં કુર્યાદતન્દ્રિતઃ ॥ ૧૦૦॥

સમ્પાત પ્રાસનાદેવ ગર્ભ વૃદ્ધિ દિને દિને ।
તસ્માદિદં કર્મ શિષ્ટાઃ કુર્વન્તિ વ્યષ્ટિ રૂપતઃ ॥ ૧૦૧॥

કર્મારમ્ભસ્તત્સમાપ્તિર્વૈ તદ્ દિવસે ભવેત્ ।
ક્રિયા મધ્યે તુ તત્ કર્તુસ્તત્પત્ન્યા દેશિકસ્ય ચ ॥ ૧૦૨॥

આશૌચાદ્યન્તરાયશ્ચેત્ સ્વિષ્ટં કર્મ તદન્તતઃ ।
કુર્યાદતો વ્યષ્ટિરેવ કાર્યા સન્તાન સિદ્ધયે ॥ ૧૦૩॥

યજમાનોશ્ચ તત્પત્ન્યૈ ક્રમાત્ સમ્પાતમાદિતઃ ।
દદ્યાત્ ઋગ્જપ પૂર્વં તુ તત્પ્રાશ્ય તતઃ પરમ્ ॥ ૧૦૪॥

તેનૈવાશ્વત્થ પત્રેણ કુમ્ભ તોયં પિબેત્ ક્રમાત્ ।
એવં પ્રતિદિનં કુર્યાત્ સમ્પાત પ્રાસનં તથા ॥ ૧૦૫॥

પ્રતિમા યુગલશ્ચૈવ કુમ્ભ યુગ્મં સદક્ષિનમ્ ।
વસ્ત્ર યુગ્મં ચ વિપ્રેન્દ્રા હોમાન્તે ષોડશે દિને ॥ ૧૦૬॥

આચાર્યાય વૈ દદ્યાત્ જીવ સન્તાન સિદ્ધયે ।
બ્રાહ્મણાન્ ભોજયેત્ પશ્ચાત્ ષડ્રસૈઃ ક્રોધવર્જિતઃ ॥ ૧૦૭॥

આશીર્વાદં ભોજનાન્તે કુર્યાદ્ બ્રાહ્મણ દક્ષિણાઃ ।
યથા શક્તિ દિશેત્ પશ્ચાદાચાર્યાય વિશેષતઃ ॥ ૧૦૮॥

સમ્ભાવનાં તથા તોષં ગો વસ્ત્રાદિ સમન્વિતમ્ ।
છન્દોગાનાં બહ્વૃચાનાં કુર્યાત્ સ્વિષ્ટ કૃદાદયઃ ॥ ૧૦૯॥

ઔત્તરં તન્ત્રકે સ્વ સ્વસૂત્રેણૈવ મુનીશ્વરાઃ ।
અથવાર્ચાય સૂત્રેણ કુર્યાત્ પું હવનં સુધીઃ ॥ ૧૧૦॥

દિનાનિ ષોડશૈવં વૈ કૃત્વા પશ્ચાત્ પરેઽહનિ ।
કુર્યાદ્ધોમં વિના સૂર્ય પ્રતિમાં ચ વિના મુદા ॥ ૧૧૧॥

ગોધૂમ તણ્ડુલે પ્રસ્થ યુગ્મકે સૂર્ય પૂજનમ્ ।
ત્રિકાલ પૂજા તત્પશ્ચાત્તદ્દાનઞ્ચ સમાચરેત્ ॥ ૧૧૨॥

પ્રસ્થદ્વય મિતે જીવ ધ્યાને ધેનું નિધાય ચ ।
સવત્સાં પૂજયેદ્વિપ્રાઃ સન્તાન તિલ હોમવત્ ॥ ૧૧૩॥

તતો નૂતન વસ્ત્રાણિ જાયા પતિ ધૃતાનિ વૈ ।
હરિદ્રાક્તાનિ દીપાર્ઘ્ય પાત્ર યુક્તાનિ મોદતઃ ॥ ૧૧૪॥

આચાર્યાયૈવ દેયાનિ નાન્યસ્મૈ પુત્ર સિદ્ધયે ।
આચાર્યેણૈવ વૈલેખ્યં નિત્યં પું સૂક્ત યન્ત્રકમ્ ॥ ૧૧૫॥

અન્યેન લિખિતં ચેત્સ્યાત્ સહ પત્ન્યાત્મનાશનમ્ ।
ઉત્તાનપાદશ્ચ મહાનિદં કૃત્વાપ્તવાન્ ધ્રુવમ્ ॥ ૧૧૬॥

માર્કણ્ડેયં ચ તત્તાત જયન્તં ચ શચીપતિઃ ।
કીર્તિમાન્ તનયં લેભે ચૈતત્ કર્મ પ્રભાવતઃ ॥ ૧૧૭॥

બહુનાત્ર કિમુક્તેન સઙ્ગ્રહેણ વદામ્યહમ્ ।
મરીચ્યાદિ મુનિશ્રેષ્ઠા રાજાનશ્ચાપ્યજાદયઃ ॥ ૧૧૮॥

લબ્ધ્વાચ્યુત સમાન્ પુત્રાન્ લેભિઽન્તે ઽચ્યુતાલયમ્ ।
ઋષ્યશૃઙ્ગેણ કથિતમિદં પુંસવનં નરાઃ ॥ ૧૧૯॥

યે કુર્વન્તિ નરશ્રેષ્ઠસ્તે ભવેયુઃ સપુત્રિણઃ ।
લબ્ધ્વેહ સકલાન્ ભોગાન્ પ્રાપ્નુયુર્હરિમન્તતઃ ॥ ૧૨૦॥

ઇત્યાદિ સનત્કુમાર સંહિતાયામુત્તર ભાગે ઋષ્યશૃઙ્ગોક્ત સન્તાન યાગ વિધિર્નામાષ્ટ સપ્તતિ તમોઽધ્યાયઃ ॥

## અથ ઋગ્વિધાનોક્ત સન્તાન યાગઃ

શુક્લ પક્ષે શુભે વારે સુ-નક્ષત્રે સુ ગોચરે ।
દ્વાદશ્યાં પુત્ર કામાય ચરું કુર્વીત વૈષ્ણવમ્ ॥ ૧॥

દમ્પત્યોરુપવાસઃ સ્યાદેકાદશ્યાં સુરાલયે ।
ઋગ્ભિઃ ષોડશભિઃ સમ્યગર્ચયિત્વા જનાર્દનમ્ ॥ ૨॥

ચરું પુરુષ સૂક્તેન શ્રપયેત્ પુત્ર કામ્યયા ।
પ્રાપ્નુયાદ્વૈષ્ણવં પુત્રમચિરાત્ સન્તતિ ક્ષમમ્ ॥ ૩॥

દ્વાદશ દ્વાદશીઃ સમ્યક્ પયસા નિર્વપેચ્ચરુમ્ ।
યઃ કરોતિ હયસ્થસ્યાધ્યાતિ વિષ્ણોઃ પરં પદમ્ ॥ ૪॥

હુત્વાગ્નિં વિધિવત્ સમ્યગૃગ્ભિઃ ષોડશભિર્બુધઃ ।
કૃતાઞ્જલિ પુટો ભૂત્વા સ્તવન્તાભિઃ પ્રયોજયેત્ ॥ ૫॥

કેશવં માર્ગશીર્ષે તુ પૌષે નારાયણં તથા ।
માધવં માઘમાસે તુ ગોવિન્દં ફાલ્ગુને પુનઃ ॥ ૬॥

ચૈત્રે ચૈવ તથા વિષ્ણું વૈશાખે મધુસૂદનમ્ ।
જ્યેષ્ઠે ત્રિવિક્રમં વિદ્યાદાષાઢે વામનં વિદુઃ ॥ ૭॥

શ્રાવણે શ્રીધરં વિદ્યાત્ હૃષીકેશં તતઃ પરે ।
આશ્વિને પદ્મનાભં તુ દામોદરં ચ કાર્ત્તિકે ॥ ૮॥

દ્વાદશૈતાનિ નામાનિ ઋષ્યશૃઙ્ગોઽબ્રવીન્ મુનિઃ ।
પૂજયેન્ માનસભિઃ સર્વાન્ કામાન્ સમશ્નુતે ॥ ૯॥

આયુષ્મન્તં સુતં સૂતે પર મેધા સમન્વિતમ્ ।
ધનવન્તં પ્રજાવન્તં ધાર્મિકં સાત્વિકં તથા ॥ ૧૦॥

સમિધોઽશ્વત્થ વૃક્ષસ્ય હુત્વાગ્નિં જુહુયાત્ પુનઃ ।
ઉપસ્થાનં હુતાશસ્ય ધ્યાત્વાર્ચ્ય મધુસૂદનમ્ ॥ ૧૧॥

હવિર્હોમં તતઃ કુર્યાત્ પ્રત્યૃચં વાગ્યતઃ શુચિઃ ।
સૂક્તેન જુહુયાદાજ્યમાદાવન્તે ચ પૂર્વવત્ ॥ ૧૨॥

હવિઃ શેષં નમસ્કૃત્ય નારી નારાયણં પતિમ્ ।
ભક્ષયિત્વા હવિઃ શેષં લબ્ધાશીઃ સંવિશેત્ ક્ષણમ્ ॥ ૧૩॥

તતસ્તુ કૃત્વેદં કર્મ કર્ત્તવ્યં દ્વિજ તર્પણમ્ ।
દ્વિતીયં સ્ત્રી નિવર્તેત યાવદ્ ગર્ભં ન વિન્દતિ ॥ ૧૪॥

અપુત્રા મૃત પુત્રા વા યા ચ કન્યા પ્રસૂયતે ।
ક્ષિપ્રં સા જનયેત્ પુત્રં ઋષ્યશૃઙ્ગો યથાઽબ્રવીત ॥ ૧૫॥

અર્ચનં સમ્પ્રવક્ષ્યામિ વિષ્ણોરમિત તેજસઃ ।
યત્ કૃત્વા મુનયઃ સર્વે બ્રહ્મ નિર્વાણ માપ્નુયુઃ ॥ ૧૬॥

અપ્સ્વગ્નૌ હૃદયે સૂર્યે સ્થણ્ડિલે પ્રતિમાસુ ચ ।
ષટ્સ્વેતેષુ હરેઃ સમ્યગર્ચનં મુનિભિઃ સ્મૃતમ્ ॥ ૧૭॥

અગ્નૌ ક્રિયાવતાં દેવો દિવિ દેવો મનીષિણામ્ ।
પ્રતિમા સ્વલ્પ બુદ્ધીનાં યોગિનાં હૃદયે હરિઃ ॥ ૧૮॥

તસ્ય સર્વગતત્વાચ્ચ સ્થણ્ડિલે ભવતાત્મનામ્ ॥ ૧૯॥

દદ્યાત્ પુરુષ સૂક્તેન યઃ પુષ્પાણ્યપ એવ વા ।
અર્ચિતં સ્યાજ્જગદિદં તેન સર્વં ચરાચરમ્ ॥ ૨૦॥

અનુષ્ટુભસ્ય સૂક્તસ્ય ત્રિષ્ટુબન્તસ્ય દેવતા ।
પુરુષોઽથ જગદ્બીજમૃષિર્નારાયણઃ સ્મૃતઃ ॥ ૨૧॥

નારાયણ મહાબાહો શ‌ૃણુષ્વૈકં મહાપ્રભો ।
વક્ષ્યે પુરુષ સૂક્તસ્ય વિધાનં ત્વર્ચનં પ્રતિ ॥ ૨૨॥

અગ્નિ કાર્યં જપ વિધિં સ્તોત્રઞ્ચૈવ તદાત્મકમ્ ।
સ્નાત્વા યથોક્ત વિધિના પ્રાઙ્મુખઃ શુદ્ધ માનસઃ ॥ ૨૩॥

પ્રથમાં વિન્યસેદ્વામે દ્વિતીયાં દક્ષિણે કરે ।
તૃતીયાં વામ પાદે ચ ચતુર્થીં દક્ષિણે ન્યસેત્ ॥ ૨૪॥

પઞ્ચમીં વામ જાનુનિ ષષ્ઠીં વૈ દક્ષિણે ન્યસેત્ ।
સપ્તમી વામ કુક્ષૌ તુ અષ્ટમીં દક્ષિણે ન્યસેત્ ॥ ૨૫॥

નવમી નાભિ દેશે તુ દશમીં હૃદયે ન્યસેત્ ।
એકાદશીં કણ્ઠદેશે દ્વાદશીં વામ બાહુકે ॥ ૨૬॥

ત્રયોદશીં દક્ષિણે ચ આસ્યે ચૈવ ચતુર્દશીમ્ ।
અક્ષ્ણોઃ પઞ્ચદશીં ચૈવ ષોડશીં મૂર્ધ્નિ વિન્યસેત્ ॥ ૨૭॥

એવં ન્યાસ વિધિં કૃત્વા પશ્ચાત્ પૂજાં સમારભેત્ ।
યથા દેહે તથા દેવે ન્યાસં કૃત્વા વિધાનતઃ ॥ ૨૮॥

આદ્યયાવાહયેદ્દેવમૃચા તુ પુરુષોત્તમમ્ ।
દ્વિતીયયાસનં દદ્યાત્ પાદ્યં ચૈવ તૃતીયકમ્ ॥ ૨૯॥

અર્ઘ્યં ચતુર્થ્યાં દાતવ્યં પઞ્ચમ્યાચમનીયકમ્ ।
ષષ્ઠ્યા સ્નાનં પ્રકુર્વીત સપ્તમ્યા વસ્ત્રમેવ તુ ॥ ૩૦॥

યજ્ઞોપવીતમષ્ટમ્યા નવમ્યા ચાનુલેપનમ્ ।
પુણ્યં દશમ્યા દાતવ્યમેકાદશ્યા તુ ધૂપકમ્ ॥ ૩૧॥

દ્વાદશ્યા દીપકં દદ્યાત્ ત્રયોદશ્યા નિવેદનમ્ ।
ચતુર્દશ્યા નમસ્કારં પઞ્ચદશ્યા પ્રદક્ષિણમ્ ॥ ૩૨॥

ષોડશ્યોદ્વાસનં કુર્યાદ્દેવદેવસ્ય ચક્રિણઃ ।
સ્નાને વસ્ત્રે ચ નૈવેદ્યે દદ્યાદાચમનીયકમ્ ॥ ૩૩॥

તતઃ પ્રદક્ષિણાં કૃત્વા જપં કુર્યાત્ સમાહિતઃ ।
યથાશક્તિ જપિત્વા તુ સૂક્તં તસ્મૈ નિવેદયેત્ ॥ ૩૪॥

દેવસ્ય દક્ષિણે પાર્શ્વે કુણ્ડં સ્થણ્ડિલમેવ વા ।
તતઃ કારયેત્ પ્રથમેનૈવ દ્વિતીયેન તુ પ્રોક્ષણમ્ ॥ ૩૫॥

તૃતીયયાગ્નિમાદધ્યાચ્ચતુર્થ્યા ચ સમિન્ધનમ્ ।
પઞ્ચમ્યાજ્યસ્ય શ્રપણં ચરોશ્ચ ક્ષપણં તથા ॥ ૩૬॥

ષષ્ઠેનૈવાગ્નિ મધ્યે તુ કલ્પયેત્ પદ્મમાસનમ્ ।
ચિન્તયેદ્દેવદેવેશં કાલાનલ સમપ્રભમ્ ॥ ૩૭॥

તતો ગન્ધં ચ પુષ્પં ચ ધૂપ દીપ નિવેદનમ્ ।
અનુજ્ઞાપ્ય તતઃ કુર્યાત્ સપ્તમ્યાદિ યથા ક્રમમ્ ॥ ૩૮॥

સમિધસ્તાવતીઃ પૂર્વં જુહુયાદભિધારિતાઃ ।
તતો ઘૃતેન જુહુયાચ્ચરુણા ચ તતઃ પુનઃ ॥ ૩૯॥

એવં હુત્વા તતશ્ચૈવમનુજ્ઞાપ્ય યથા ક્રમમ્ ।
અગ્નેર્ભગવતસ્તસ્ય સમીપે સ્તોત્રમુચ્ચરેત્ ॥ ૪૦॥

જિતં તે પુણ્ડરીકાક્ષં નમસ્તે વિશ્વ ભાવન ।
સુબ્રહ્મણ્ય નમસ્તેસ્તુ મહાપુરુષ પૂર્વજ ॥ ૪૧॥

નમો હિરણ્યગર્ભાય પ્રધાનવ્યક્ત રૂપિણે ।
ૐ નમો વાસુદેવાય શુદ્ધ જ્ઞાન સ્વરૂપિણે ॥ ૪૨॥

દેવાનાં દાનવાનાં ચ સામાન્યમસિ દૈવતમ્ ।

સર્વદા ચરણ દ્વન્દ્વં બ્રજામિ શરણં તવ ॥ ૪૩॥

એકસ્ત્વમસિ લોકસ્ય સ્રષ્ટા સંહારકસ્તથા- ।
ઽવ્યક્તશ્ચાનુમન્તા ચ ગુણ માયા સમાવૃતઃ ॥ ૪૪॥

સંસાર સાગરં ઘોરમનન્ત ક્લેશ ભાજનમ્ ।
ત્વામેવ શરણં પ્રાપ્ય નિસ્તરન્તિ મનીષિણઃ ॥ ૪૫॥

ન તે રૂપં ન ચાકારો નાયુધાનિ ન ચાસ્પદમ્ ।
તથાપિ પુરુષાકારો ભક્તાનાં ત્વં પ્રકાશસે ॥ ૪૬॥

નૈવ કિઞ્ચિદસાધ્યં તે ન ચ સાધ્યોઽસિ કસ્યચિત્ ॥ ૪૭॥

કાર્યાણાં કરણં પૂર્વં વચસાં વાચ્યમુત્તમમ્ ।
યોગિનાં પરમાં સિદ્ધિં વિન્દન્તિ પરમં વિદઃ ॥ ૪૮॥

અહં ભીતોઽસ્મિ દેવેશ સંસારેઽસ્મિન્ મહા ભયે ।
ત્રાહિ માં પુણ્ડરીકાક્ષ ન જાને પરમં પદમ્ ॥ ૪૯॥

કાલેષ્વપિ ચ સર્વેષુ દિક્ષુ સર્વાસુ ચાચ્યુત ।
શરીરે ચ ગતૌ વાપિ વર્તતે મે મહદ્ ભયમ્ ॥ ૫૦॥

ત્વત્ પાદ કમલાદન્યન્ન મે જન્માન્તરેષ્વપિ ।
નિમિત્તં કુશલસ્યાસ્તિ એવં ગચ્છામિ સદ્ગતિમ્ ॥ ૫૧॥

જ્ઞાનં યદિદં પ્રાપ્તં યદિદં જ્ઞાનમર્જિતમ્ ।
જન્માન્તરેઽપિ મે દેવ માભૂદસ્ય પરિક્ષયઃ ॥ ૫૨॥

દુર્ગતાવાપિ જાતસ્ય ત્વદ્ગતો મે મનોરથઃ ।
યદિ નાથં ન વિન્દેયં તાવતાસ્મિ કૃતી સદા ॥ ૫૩॥

અકામ કલુષં ચિત્તં મમ તે પાદયોઃ સ્થિતમ્ ।
કામયે વિષ્ણુ પાદૌ તુ સર્વ જન્મસુ કેવલમ્ ॥ ૫૪॥

પુરુષસ્ય હરેઃ સૂક્તં સ્વર્ગ્યં ધન્યં યશસ્કરમ્ ।
આત્મજ્ઞાનમિદં પુણ્યં યોગ જ્ઞાનમિદં પરમ્ ॥ ૫૫॥

ઇત્યેવ મનયા સ્તુત્યા સ્તુત્વા દેવં દિને દિને ।
કિઙ્કરોઽસ્મીતિ ચાત્માનં દેવાયૈવ નિવેદયેત્ ॥ ૫૬॥

ફલાહારો ભવેન્માસં પશ્યત્યાત્માનમાત્મનિ ।

ફલાનિ ભુક્તોપસેવન્ માસમદ્ભિશ્ચ વર્તયેત્ ॥ ૫૭॥

અરણ્ય નિવસેન્નિત્યં જપન્નેતમૃષિં સદા ।
ત્રિસ્ત્રિષવણ કાલેષુ સ્નાયાદપ્સુ સમાહિતઃ ॥ ૫૮॥

આદિત્યમુપતિષ્ઠેન સૂક્તેનાનેન નિત્યશઃ ।
આજ્યાહુતીરનેનૈવ હુત્વૈતં ચિન્તયેદૃષિમ્ ॥ ૫૯॥

ઊર્ધ્વં માસાત્ ફલાહારાત્ ત્રિભિર્વર્ષૈર્જયેદ્દિવમ્ ।
તદ્ ભક્તસ્તન્મનાયુક્તો દશવર્ષાણ્યનન્યભાક્ ॥ ૬૦॥

સાક્ષાત્ પશ્યતિ તં દેવં નારાયણમનામયમ્ ।
ગ્રાહ્યમત્યન્ત યત્નેન ત્વષ્ટારં જગતોઽવ્યયમ્ ॥ ૬૧॥

ગૃહસ્થ ધર્મે વર્તેત ન્યાય વૃત્તઃ સમાહિતઃ ।
એતદેવં ચિન્તયેત નારાયણમનામયમ્ ॥ ૬૨॥

અતિ પાતક સંયુક્તં કાલેન સુકૃતી ભવેત્ ।
યેન યેન ચ કામેન જપેદિમં ઋષિં સદા ॥ ૬૩॥

સ સકામ સમૃધ્દઃ સ્યાચ્છ્રદ્દધાનસ્ય કુર્વતઃ ।
હોમં વાપ્યથવા જાપ્યમુપહારમથો ચરુમ્ ॥ ૬૪॥

કુર્વીત યેન કામેન તત્ સિધ્દિમવધારયેત્ ।
જ્ઞાતિ શ્રૈષ્ઠ્યં મહદ્વિત્તં યશો લોકે પરાં ગતિમ્ ॥ ૬૫॥

પાપેન વિપ્ર મોક્ષસ્તુ તત્ સિધ્દિમવધારયેત્ ।
જ્ઞાન ગમ્યં પરં સૂક્ષ્મં વ્યાપ્ય સર્વં વ્યવસ્થિતમ્ ॥ ૬૬॥

ગ્રાહ્યમત્યન્ત યત્નેન બ્રહ્માભ્યેતિ સનાતનમ્ ।
સહસ્રશીર્ષેતિ સૂક્તં સર્વ કામ ફલપ્રદમ્ ॥ ૬૭॥

વેદ ગર્ભ શરીરેણ સ વૈ નારાયણ સ્મૃતઃ ।
બ્રહ્મેન્દ્ર રુદ્ર પર્જન્યા અત્ર સૂક્તે વ્યવસ્થિતાઃ ॥ ૬૮॥

અત્રસ્થમેતદ્ દ્રષ્ટવ્યં જગત્ સ્થાવર જઙ્ગમમ્ ।
અતઃ સમ્પઠ્યમાનોઽપિ ભક્તિં ન પરિહારયેત્ ॥ ૬૯॥

ભક્તાનુકમ્પી ભગવાન્ શ્રૂયતે પુરુષોત્તમઃ ।
પૂજાર્થં તસ્ય દેવસ્ય વનાત્ સ્વયમુદાહૃતાત્ ॥ ૭૦॥

આરણ્યક વિધાનેન નિર્વપેત્ પ્રત્યહં ચરુમ્ ।
નારાયણાય સ્વાહેતિ મન્ત્રાન્તે જુહુયાદ્ધવિઃ ॥ ૭૧॥

આસહસ્રાત્તતશ્ચાક્ષુર્દિવ્યં હોતુર્દદાતિ સઃ ।
અપિ વા ચરુ સાહસ્રં તત્રૈણૈકેન નિર્વપેત્ ॥ ૭૨॥

યાવન્તો વાપિ શક્યન્તે અહ્ના સર્વાન્ સમાપયેત્ ।
સહસ્રસ્યેપ્સિતાનાં ચ કામાનાં લભતે ફલમ્ ॥ ૭૩॥

પુરુષાયુઃ સમાયુક્તઃ સિદ્ધો વાપિ ચરેન્ મહીમ્ ॥ ૭૪।
એતત્તુ યઃ પઠતિ કેવલમેવ સૂક્તં નારાયણસ્ય ચરણાવભિવન્દ્ય નિત્યમ્ ।
પાઠેન તેન પરમેણ સનાતનસ્ય સ્થાનં જરા મરણ વર્જિતમેવ વિષ્ણોઃ ॥ ૭૫॥

હવિષ્યાગ્નૌ જલે પુષ્પૈર્ધ્યાનેન હૃદયે હરિમ્ ।
યજન્તિ સૂરયો નિત્યં જપેત રવિ મણ્ડલે ॥ ૭૬॥

બિલ્વ પત્રં શમી પત્રં પત્રં ભૃઙ્ગારકસ્ય ચ ।
માલતી કુશ પદ્મં ચ સદ્યસ્તુષ્ટિકરં હરેઃ ॥ ૭૭॥

યત્રૈતત્ પઠ્યતે કિઞ્ચિત્તદ્ ધ્યાયેન્ મનસૈવ તુ ।
સમ્પાદ્ય તત્ પ્રસાદાચ્ચ દેવદેવસ્ય ચક્રિણઃ ॥ ૭૮॥

પત્રૈશ્ચ પુષ્પૈશ્ચ ફલૈશ્ચ દિવ્યૈરક્રીત લબ્ધૈશ્ચ સદૈવ સત્સુ ।
ભક્ત્યૈક લભ્યે પુરુષે પુરાણે મુક્ત્યૈ કિમર્થં ક્રિયતે તુ યત્નઃ ॥ ૭૯॥

ઇત્યેવમુક્તઃ પુરુષસ્ય વિષ્ણોરર્ચા વિધિર્વિષ્ણુ કુમાર નામ્ના ।
મુક્ત્યૈક માર્ગ પ્રતિબોધનાય દૃષ્ટ્વા વિધાનં ત્વિહ નારદોક્તમ્ ॥ ૮૦॥

।ઇતિ ।

## ફલશ્રુતિઃ

પુત્રાર્થે શાલિબીજેન ધનાર્થે બિલ્વ પત્રકૈઃ ।
દૂર્વાભિરાયુષ્કામસ્તુ પુષ્ટિકામસ્તુ વેતસૈઃ ॥

કન્યા કામસ્તુ લાજાભિઃ, પશુકામો ઘૃતેન તુ ।
વિદ્યા કામસ્તુ પાલાશૈર્દશાંશેન તુ હોમયેત્ ॥

ધાન્ય કામો યવૈશ્ચૈવ ગુગ્ગુલેન રિપુક્ષયે ॥

તિલૈરારોગ્ય કામસ્તુ બ્રીહિભિઃ સુખમશ્નુતે ॥ (તન્ત્રસાર)
પુત્રકામઃ પુરુષ સૂક્તેન તર્પણં માર્જનં ચ કૃત્વા શ્રીવૈષ્ણવાન્ ભોજયેદિતિ ગ્રન્થ વિસ્તાર ભયાદિકં ન લિખ્યતે । અર્થાનુસન્ધાન પુરસ્સરં ભગવતો નારાયણસ્ય ષોડશર્ચસ્ય પુરુષ સૂક્તસ્ય ન્યાસં પાઠં પૂજાં હોમં તર્પણં માર્જનં શ્રી વૈષ્ણવારાધનં ચ કુર્વન્ શ્રી વૈષ્ણવઃ ઇહ પુત્રાદિ સકલ સૌભાગ્ય નિધાનં પરત્ર પરમ સુખ ભાજનં ભવતીતિ સર્વત્ર સર્વ મઙ્ગલમ્ ।

। ઇતિ પુરુષ સૂક્ત પુંશ્ચરણં સમ્પૂર્ણમ્ ।

## અથ પુરુષ સૂક્ત માહાત્મ્યમ્

તાવાવાં પરમે વ્યોમ્નિ પિતરૌ જગતઃ પરૌ ।
અનુગ્રહાય લોકાનાં સ્થિતૌ સ્વઃ પરયા શ્રિયા ॥ ૧॥ (લક્ષ્મી તન્ત્ર)

કદાચિત્ કૃપયાવિષ્ટૌ જીવાનાં હિત કામ્યયા ।
સુખિનઃ સ્યુરિમે જીવાઃ પ્રાપ્નુયુર્નૌ કથં ત્વિતિ ॥ ૨॥

ઉપાયાન્વેષણે યત્તૌ પરમેણ સમાધિના ।
મથ્નાવસ્ત્વતિ ગમ્ભીરં શબ્દ બ્રહ્મ મહોદધિમ્ ॥ ૩॥

મથ્યમાનાત્તતસ્તસ્માત્ સામર્ગ્યજુષ સઙ્કુલાત્ ।
તત્સૂક્ત મિથુનં દિવ્યં દધ્નો ઘૃતમિવોત્થિતમ્ ॥ ૪॥

ઇદં પુરુષ સૂક્તં હિ સર્વ વેદેષુ પઠ્યતે ।
ઋતં સત્યઞ્ચ વિખ્યાતમૃષિ સિંહેન ચિન્તિતમ્ ॥ ૫॥ (વ્યાસ)

બ્રહ્મ યજ્ઞ જપન્ સૂક્તં પુરુષં ચિન્તયન્ હરિમ્ ।
સ સર્વાન્ જપતે વેદાન્ સાઙ્ગોપાઙ્ગાન્વિધાનતઃ ॥ ૬॥ (વિષ્ણુધર્મોત્તરપુરાણ)

વેદેષુ પૌરુષં સૂક્તં પુરાણેષુ ચ વૈષ્ણવમ્ ।
ભારતે ભગવદ્ ગીતા ધર્મશાસ્ત્રેષુ માનવમ્ ॥ ૭॥ (પદ્મ પુરાણ)

પૌરુષં સૂક્તમાવર્ત્યમુચ્યતે સર્વ કિલ્બિષાત્ ॥ ૮॥ (યમ સ્મૃતિ)

દદ્યાત્ પુરુષ સૂક્તેન આપઃ પુષ્પાણિ ચૈવ હિ ।
અર્ચિતં સ્યાદિદં તેન વિશ્વં ભુવન સપ્તકમ્ ॥ ૯॥ (પારાશર સ્મૃતિ)

પ્રતિ વેદં મહાભાગ યત્ સૂક્તં પૌરુષં સ્મૃતમ્ ।
સર્વ કર્મકરં પુણ્યં પવિત્રં પાપ સૂદનમ્ ॥ ૧૦॥ (પુષ્કર સંહિતા)

એકૈકયા ઋચા રામ સ્નાતો દત્વા જલાઞ્જલિમ્ ।
પૌરુષેણ ચ સૂક્તેન મુચ્યતે સર્વ કિલ્બિષાત્ ॥ ૧૧॥

અન્તર્જલ ગતો જપ્ત્વા તથા સૂક્તં તુ પૌરુષમ્ ।
સર્વ કલ્મષ નિર્મુક્તો યથેષ્ટાં લભતે ગતિમ્ ॥ ૧૨॥

અકામઃ પૌરુષં સૂક્તં જપ્ત્વા નિત્યમતન્દ્રિતઃ ।
નરો યાતિ મહાભાગ તદ્ વિષ્ણોઃ પરમં પદમ્ ॥ ૧૩॥

પુરુષસ્ય હરેઃ સૂક્તં સ્વર્ગ્યં ધન્યં યશસ્કરમ્ ।
આત્મજ્ઞાનમિદં પુણ્યં યોગ જ્ઞાનમિદં પદમ્ ॥ ૧૪॥ (શૌનક સ્મૃતિ)

ધૃતોર્ધ્વપુણ્ડ્રઃ પરમેશિતારં નારાયણં પૂજયતિ સ્મ ભક્ત્યા ।
અર્ઘ્યાદિભિઃ પૌરુષ સૂક્ત મન્ત્રૈઃ સમાપ્નુયાદ્ વિષ્ણુ પદં મહાત્મા ॥ (મહોપનિષદ્)
પૌરુષેણૈવ સૂક્તેન તતો વિષ્ણું સમર્ચયેત્ ॥ ૧૬॥ (શાણ્ડિલ્ય સ્મૃતિ)

એષા વૈષ્ણવી નામ સંહિતૈતાં પ્રયુઞ્જન્ વિષ્ણું પ્રીણાતિ ॥ ૧૭॥ (બ્રાહ્મણ)

## અથ મુદ્ગલોપનિષદ્

શ્રીમત્ પુરુષ સૂક્તાર્થં પૂર્ણાનન્દ કલેવરમ્ ।
પુરુષોત્તમ વિખ્યાતં પૂર્ણં બ્રહ્મ ભવામ્યહમ્ ॥

ૐ વાઙ્ મે મનસિ પ્રતિષ્ઠિતા । મનો મે વાચિ પ્રતિષ્ઠિતમ્ । આવિરાવીર્મ એધિ વેદસ્ય મ આણીસ્થઃ શ્રુતં મે । મા પ્રહાસીરનેનાધીતેનાહોરાત્રાત્ સન્દધામિ । ઋતં વદિષ્યામિ । સત્યં વદિષ્યામિ । તન્મામવતુ । તદ્વક્તારમવતુ । અવતુ મામ્ । અવતુ વક્તારમવતુ વક્તારમ્ । હરિઃ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।
ૐ પુરુષ સૂક્તાર્થ નિર્ણયં વ્યાખ્યાસ્યામઃ । પુરુષ સંહિતાયાં પુરુષ સૂક્તાર્થઃ સઙ્ગ્રહેણ પ્રોચ્યતે ।
સહસ્રશીર્ષેત્યત્ર સ શબ્દોઽનન્ત વાચકઃ ।
અનન્ત યોજનં પ્રાહ દશાઙ્ગુલ વચસ્તથા ॥ ૧॥

તસ્ય પ્રથમયા વિષ્ણોર્દેશતો વ્યાપ્તિરીરિતા ।
દ્વિતીયયા ચાસ્ય વિષ્ણોઃ કાલતો વ્યાપ્તિરુચ્યતે ॥ ૨॥

વિષ્ણોર્મોક્ષપ્રદત્વં ચ કથિતં તુ તૃતીયયા ।
એતાવાનિતિ મન્ત્રેણ વૈભવં કથિતં હરેઃ ॥ ૩॥

એતેનૈવ ચ મન્ત્રેણ ચતુર્વ્યૂહો વિભાષિતઃ ।
ત્રિપાદિત્યનયા પ્રોક્તમનિરુદ્ધસ્ય વૈભવમ્ ॥ ૪॥

તસ્માદ્ વિરાડિત્યનયા પાદ નારાયણાદ્ હરેઃ ।
પ્રકૃતેઃ પુરુષસ્યાપિ સમુત્પત્તિઃ પ્રદર્શિતા ॥ ૫॥

યત્ પુરુષેણેત્યનયા સૃષ્ટિ યજ્ઞઃ સમીરિતઃ ।
સપ્તાસ્યાસન્ પરિધયઃ સમિધશ્ચ સમીરિતઃ ॥ ૬॥

તં યજ્ઞમિતિ મન્ત્રેણ સૃષ્ટિ યજ્ઞઃ સમીરિતઃ ।
અનેનૈવ ચ મન્ત્રેણ મોક્ષશ્ચ સમુદીરિતઃ ॥ ૭॥

તસ્માદિતિ ચ મન્ત્રેણ જગત્ સૃષ્ટિઃ સમીરિતઃ ।
વેદાહમિતિ મન્ત્રાભ્યાં વૈભવં કથિતં હરેઃ ॥ ૮॥

યજ્ઞેનેત્યુપસંહારઃ સૃષ્ટેર્મોક્ષસ્ય ચેરિતઃ ।
ય એવમેતજ્જાનાતિ સ હિ મુક્તો ભવેદિતિ ॥ ૯॥

## (અધ્યાય ૧)

અથ તથા મુદ્ગલોપનિષદિ પુરુષ સૂક્તસ્ય વૈભવં વિસ્તરેણ પ્રતિપાદિતમ્ ।
વાસુદેવ ઇન્દ્રાયભગવજ્જ્ઞાનમુપદિશ્ય પુનરપિ સૂક્ષ્મ શ્રવણાય પ્રણતાયેન્દ્રાય પરમ રહસ્યભૂતં પુરુષ સૂક્તાભ્યાં ખણ્ડ દ્વયાભ્યામુપદિશત્ ।
ખણ્ડાવુચ્યેતે ।
યોઽયમુક્તઃ સ પુરુષો નામ રૂપજ્ઞાનાગોચરં સંસારિણામતિ દુર્જ્ઞેયં વિષયં વિહાય ક્લેશાદિભિઃ સઙ્ક્લિષ્ટ દેવાદિ જિહીર્ષયા સહસ્ર કલાવયવ કલ્યાણં દૃષ્ટ માત્રેણ મોક્ષદં વેષમાદદે ।
તેન વેષેણ ભૂમ્યાદિ લોકં વ્યાપ્યાનન્ત યોજનમત્યતિષ્ઠત્ ।
પુરુષો  નારાયણો ભૂતં ભવ્યં ભવિષ્યચ્ચાસીત્ ।
સ એષ સર્વેષાં મોક્ષદશ્ચાસીત્ ।
સ ચ સર્વસ્માન્ મહિમ્નો જ્યાયાત્ ।
તસ્માન્ન કોઽપિ જ્યાયાન્ ।
મહાપુરુષ આત્માનં ચતુર્ધા કૃત્વા ત્રિપાદેન પરમે વ્યોમ્નિ ચાસીત્ ।
ઇતરેણ ચતુર્થેનાનિરુદ્ધ નારાયણેન વિશ્વાન્યાસન્ ।
સ ચ પાદ નારાયણો જગત્ સ્રષ્ટું પ્રકૃતિમજનયત્ ।
સ સમૃદ્ધ કાયઃ સન્ સૃષ્ટિ કર્મ ન જજ્ઞિવાન્ ।
સોઽનિરુદ્ધ નારાયણસ્તસ્મૈ સૃષ્ટિમુપાદિશત્ ।
બ્રહ્મન્ સ્તવેન્દ્રિયાણિ યાજકાનિ ધ્યાત્વા કોશભૂતં દૃઢં ગ્રન્થિ કલેવરં હવિર્ધ્યાત્વા માં  હવિર્ભુજં ધ્યાત્વા વસન્ત કાલમાજ્યં ધ્યાત્વા ગ્રીષ્મમિધ્મં ધ્યાત્વા શરદૃતું રસં ધ્યાત્વૈવ મગ્નૌ હુત્વાઙ્ગ સ્પર્શાત્ કલેવરો વજ્રં હીષ્યતે ।

તતઃ સ્વ કાર્યાન્ સર્વ પ્રાણિ જીવાન્ સૃષ્ટ્વા પશ્ચાદ્યાઃ પ્રાદુર્ભવિષ્યન્તિ ।
તતઃ સ્થાવર જઙ્ગમાત્મકં જગદ્ ભવિષ્યતિ ।
એતેન જીવાત્મનોર્યોગેન મોક્ષ પ્રકારશ્ચ કથિત ઇત્યનુસન્ધેયમ્ ।
ય ઇમં સૃષ્ટિ યજ્ઞં જાનાતિ મોક્ષ પ્રકારં ચ સર્વમાયુરેતિ ॥ ૨॥

એકો દેવો બહુધા નિવિષ્ટ અજાયમાનો બહુધા વિજાયતે ।
તામેતમગ્નિરિત્યધ્વર્યવ ઉપાસતે ।
યજૂરિત્યેષ હીદં સર્વં યુનક્તિ ।
સામેતિ છન્દોગાઃ ।
એતસ્મિન્ હીદં સર્વં પ્રતિષ્ઠિતમ્ ।
વિષમિતિ સર્પાઃ ।
સર્પ ઇતિ સર્પવિદઃ ।
ઊર્ગિતિ દેવાઃ ।
રયિરિતિ મનુષ્યાઃ ।
માયેત્યસુરાઃ ।
સ્વધેતિ પિતરઃ ।
દેવજન ઇતિ દેવજન વિદઃ ।
રૂપમિતિ ગન્ધર્વાઃ ।
ગન્ધર્વ ઇત્યપ્સરસઃ ।
તં યથા યથોપાસતે તથૈવ ભવતિ ।
તસ્માદ્ બ્રાહ્મણઃ પુરુષ રૂપં પરં બ્રહ્મૈવાહમિતિ ભાવયેત્ ।
તદ્રૂપો ભવતિ ય એવં વેદ ॥ ૩॥

તદ્ બ્રહ્મ તાપત્રયાતીતં ષટ્ કોષ વિનિર્મુક્તં ષડૂર્મિ વર્જિતં પઞ્ચ કોશાતીતં ષડ્ભાવ વિકાર શૂન્યમેવમાદિ સર્વં વિલક્ષણં ભવતિ । તાપત્રયં ત્વાધ્યાત્મિકાધિભૌતિકાધિદૈવિકં કર્તૃ-કર્મ કાર્ય જ્ઞાતૃ જ્ઞેય ભોક્તૃ ભોગ ભોગ્યમિતિ ત્રિવિધમ્ ।
ત્વઙ્ માંસ શોણિતાસ્થિ સ્નાયુ મજ્જાઃ ષટ્ કોશાઃ ।
કામ ક્રોધ લોભ મોહ મદ માત્સર્યમિત્યરિ ષડ્વર્ગઃ ।
અન્નમય પ્રાણમય મનોમય વિજ્ઞાનમયાનન્દમયા ઇતિ પઞ્ચ કોશાઃ ।
પ્રિયાત્મ જનન વર્ધન પરિણામ ક્ષય નાશાઃ ષડ્ભાવાઃ ।
અશનાયા પિપાસા શોક મોહ જરા મરણાનીતિ ષડૂર્મયઃ ।
કુલ ગોત્ર જાતિ વર્ણાશ્રમ રૂપાણિ ષડ્ભ્રમાઃ ।
એતદ્યોગેન પરમ પુરુષો જીવો ભવતિ નાન્યઃ ।

ય એતદુપનિષદં નિત્યમધીતે સોऽગ્નિપૂતો ભવતિ ।
સ વાયુ પૂતો ભવતિ ।
સ આદિત્ય પૂતો ભવતિ ।
અરોગી ભવતિ ।
શ્રીમાંશ્ચ ભવતિ ।
પુત્ર પૌત્રાદિભિઃ સમૃદ્ધો ભવતિ ।
વિદ્વાંશ્ચ ભવતિ ।
મહા પાતકાત્ પૂતો ભવતિ ।
સુરા પાનાત્ પૂતો ભવતિ ।
અગમ્યા ગમનાત્ પૂતો ભવતિ ।
માતૃ ગમનાત્ પૂતો ભવતિ ।
દુહિતૃ સ્નુષાભિ ગમનાત્ પૂતો ભવતિ ।
સ્વર્ણ સ્તેયાત્ પૂતો ભવતિ ।
વેદિ જન્મ હાનાત્ પૂતો ભવતિ ।
ગુરોરશુશ્રૂષણાત્ પૂતો ભવતિ ।
અયાજ્ય યાજનાત્ પૂતો ભવતિ ।
અભક્ષ્ય ભક્ષણાત્ પૂતો ભવતિ ।
ઉગ્ર પ્રતિગ્રહાત્ પૂતો ભવતિ ।
પરદાર ગમનાદ્ પૂતો ભવતિ ।
કામ ક્રોધ લોભ મોહેર્ષ્યાદિભિરબાધિતો ભવતિ ।
સર્વેભ્ય પાપેભ્યો મુક્તો ભવતિ ।
ઇહ જન્મનિ પુરુષો ભવતિ ।
તસ્માદેતત્ પુરુષ સૂક્તાર્થમતિ રહસ્યં રાજ ગુહ્યં દેવ ગુહ્યં ગુહ્યાદપિ ગુહ્યતરં નાદીક્ષિતાયોપદિશેત્ ।
નાનૂચાનાય ।
ન બહુ ભાષિણે ।
નાપ્રિયવાદિને ।
નાસંવત્સર વેદિને ।
નાતુષ્ટાય ।
નાનધીત વેદાયોપદિશેત્ ।
ગુરુરપ્યેવં વિચ્છુચૌ દેશે પુણ્ય નક્ષત્રે પ્રાણાનાયમ્ય પુરુષં ધ્યાયન્ ઉપસન્નાય શિષ્યાય દક્ષિણ કર્ણે પુરુષ સૂક્તાર્થમુપદિશેદ્વિદ્વાન્ ।
ન બહુશો વદેત્ ।

યાતયામો ભવતિ ।
અસકૃત્ કર્ણમુપદિશેત્ ।
એતત્ કુર્વાણોઽધ્યેતાધ્યાપકશ્ચ ઇહ જન્મનિ પુરુષો ભવતીત્યુપનિષદ્ ॥ ૪॥

ઇતિ મુદ્ગલોપનિષત્ સમાપ્તા ।

## અથ ચક્રાબ્જ મણ્ડલ દેવતા પૂજા વિધિઃ

(શ્રી રામાનુજાચાર્ય પરમ્પરાયાં વિષ્વક્સેનાચાર્યેણ ઉપદિષ્ટઃ)
અથ શ્રી વૈષ્ણવઃ શુચિઃ પ્રયતઃ પીતામ્બર-ધરઃ શ્રી ચૂર્ણ યુક્ત દ્વાદશ શ્વેતોર્ધ્વ-પુણ્ડ્ર ધરઃ તુલસી નલિનાક્ષ માલા ધરઃ પ્રધાન વેદ્યાં શ્વેત વસ્ત્રં પ્રસાર્ય તત્ર ચક્રાબ્જ મણ્ડલમાલિખ્ય તત્ર સ્થિતાનાં દેવાનાં ષોડશોપચારૈઃ પૂજનં કુર્યાત્ ।
પ્રાઙ્મુખો યજમાનઃ દર્ભેષ્વાસીનો દર્ભાન્ ધારયમાણઃ પવિત્રપાણિઃ । ૐ અચ્યુતાય નમઃ । ૐ અનન્તાય નમઃ । ૐ ગોવિન્દાય નમઃ । ઇતિ મન્ત્ર ત્રયેણ દક્ષિણ હસ્તેન પૃથક્ પૃથક્ ત્રિરાચમ્ય શુદ્ધોદકેન સ્વ દક્ષિણ હસ્તં પ્રક્ષાલ્યાસૂન્ સંસ્પૃશ્ય પ્રાણાનાયમ્ય કરે સાક્ષત પુષ્પ ફલ જલ દ્રવ્યાણ્યાદાય । હરિઃ ૐ તત્સત્ ગોવિન્દ ગોવિન્દ ગોવિન્દ અદ્યેત્યાદિ અસ્યાં શુભ પુણ્ય તિથૌ અસ્મિન્ કર્મણિ ભગવદાજ્ઞયા ભગવત્ કૈઙ્કર્યત્વેન પ્રધાન વેદ્યાં શ્રી ચક્રાબ્જ મણ્ડલે દેવાનાં સ્થાપનં પૂજનં ચ કરિષ્યે-ઇતિ સઙ્કલ્પ્ય ।
લક્ષ્મીનાથ સમારમ્ભાં નાથ યામુન મધ્યમામ્ ।
અસ્મદાચાર્ય પર્યન્તાં વન્દે ગુરુ પરમ્પરામ્ ॥ ૧॥

શ્રીશં શ્રીસૈન્યનાથં વકુલધરમુનિં નાથ પઙ્કેરુહાક્ષૌ,
શ્રી રામં યામુનેયં વરમપિ ચ મહાપૂર્ણ રામાનુજાચાર્યૌ ।
ગોવિન્દં ભટ્ટવેદાન્ત્યથ વરકલિજિદ્વંશ દાસાંશ્ચ કૃષ્ણમ્,
લોકાર્ય શૈલનાથં વરવર મુનિમપ્યહં ચિન્તયામિ ॥ ૨॥

ઇતિ ગુરુ પરમ્પરામનુસન્ધાય પુણ્યાહ જલેન-
યેન દેવાઃ પવિત્રેણ આત્માનં પુનાતે સદા । તેન સહસ્રધારેણ પાવમાન્યઃ પુવન્તુ મામ્ ।
ઇત્યાત્માનં પૂજા સામગ્રીં ચ સમ્પ્રોક્ષ્ય દક્ષિણ હસ્તેન પીતાક્ષતાત્ ગૃહીત્વા આવાહયેત્ । તદ્ યથા-
યસ્મિનૃચઃ સામ યજૂંષિ યસ્મિન્ પ્રતિષ્ઠિતા રથનાભાવિવારાઃ ।
યસ્મિંશ્ચિત્તં સર્વમોતં પ્રજાનાં તન્મે મનઃ શિવ સઙ્કલ્પમસ્તુ ॥ (યજુ, ૩૪/૫)
મધ્યે પીત કર્ણિકાયામ્-ઓં મન્ત્રાધ્વને નમઃ-મન્ત્રાધ્વાનમાવાહયામિ-ઇતિ મન્ત્રાધ્વાનમાવાહ્ય અર્ઘ્ય પાદ્યાચમન સ્નાન વસ્ત્રોપવીત ગન્ધ પુષ્પ ધૂપ દીપ નૈવેદ્યાચમન તામ્બૂલ પૂગીફલ દક્ષિણા નમસ્કારૈઃ પૂજયેત્ ॥ ૧॥

તત્ત્વા યામિ બ્રહ્મણા વન્દમાનસ્તદા શાસ્તે યજમાનો હવિર્ભિઃ ।
અહેડમાનો વરુણેહ બોધ્યરુશંસ મા ન આયુઃ પ્ર મોષીઃ ॥ (યજુ, ૧૮/૪૯, ૨૧/૨)
ૐ તત્ત્વાધ્વને નમઃ-તત્ત્વાધ્વાનમાવાહયામિ-ઇત્યરુણ કેશરેષુ તત્ત્વાધ્વાનમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૨॥

વેદાહમેતં પુરુષં મહાન્તમાદિત્યવર્ણં તમસઃ પરસ્તાત્ ।
તમેવ વિદિત્વાઽતિમૃત્યુમેતિ નાન્યઃ પન્થા વિદ્યતેઽયનાય । (શ્વેતાશ્વતર ઉપનિષદ્, ૩/૭)
દલેષુ-ઓં વર્ણાધ્વને નમઃ વર્ણાધ્વાનમાવાહયામિ-ઇતિ વર્ણાધ્વાનમાવાહ્ય સમર્ચયેત્ ॥ ૩॥

ત્રીણિ પદા વિચક્રમે વિષ્ણુર્ગોપા અદાભ્યઃ । અતો ધર્માણિ ધારયન્ ।
(ઋક્, ૧/૨૨/૧૮, સામ, ૧૬૭૦, વાજ।યજુ, ૩૪/૪૩, તૈત્તિરીય બ્રાહ્મણ, ૨/૪/૬/૧)
નાભૌ-ઓં પદાધ્વને નમઃ પદાધ્વનમાવાહયામિ-ઇતિ પદાધ્વનમાવાહ્ય પ્રણમેત્ ॥ ૪॥

યેનેદં ભૂતં ભુવનં ભવિષ્યત્ પરિગૃહીતમમૃતેન સર્વમ્ ।
યેન યજ્ઞાસ્તાયતે સપ્તહોતા તન્મે મનઃ શિવ સઙ્કલ્પમસ્તુ ॥ (વાજ । યજુ । ૩૪/૪)
અરુણારેષુ- ૐ કાલાધ્વને નમઃ કાલાધ્વનમાવાહયામિ ઇતિ કાલાધ્વનમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૫॥

પ્ર તદ્ વિષ્ણુ સ્તવતે વીર્યેણ મૃગો ન ભીમઃ કુચરો ગિરિષ્ઠાઃ ।
યસ્યોરુષુ ત્રિષુ વિક્રમણેષ્વધિક્ષિયન્તિ ભુવનાનિ વિશ્વા ॥

(વાજ । યજુ । ૫/૨૦, ઋક્, ૧/૧૫૪/૨, અથર્વ, ૭/૨૬/૨-૩, તૈત્તિરીય બ્રાહ્મણ્, ૨/૪/૩/૪, નિરુક્ત, ૧/૨૦)
નેમૌ-ઓં ભુવનાધ્વને નમઃ ભુવનાધ્વાનમાવાહયામિ ઇતિ ભુવનાધ્વાનમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૬॥

તતઃ કર્ણિકાસ્થ શુક્લાષ્ટવિન્દુષુ નારાયણાષ્ટાક્ષરમન્ત્રાક્ષરાણિ પૂજયેત્ । તદ્યથા-
સહસ્રશીર્ષં દેવં સહસ્રાક્ષં વિશ્વ શમ્ભુવં (સમ્ભવમ્)।
વિશ્વતઃ પરમં નિત્યં વિશ્વં નારાયણં હરિમ્ । (મહોપનિષદ્, ૧/૫, ચતુર્વેદોપનિષદ્, ૨)
ઇતિ મન્ત્રેણ પૂર્વે પ્રથમ વિન્દૌ-ઓં જ્ઞાનસ્વરૂપ કુમુદ પાણ્ડર વર્ણાય નમઃ, જ્ઞાન સ્વરૂપ કુમુદ પાણ્ડરમાવાહ્ય-ઇતિ ઓઙ્કારમાવાહ્ય સર્વોપચારૈઃ મૂલ મન્ત્રપ્રથમાક્ષરં પૂજયેત્ ॥ ૭॥

ન હિ તેષામમા ચન નાધ્વસુ વારણેષુ ।
ઈશે રિપુરઘશંસઃ ॥ (યજુ, ૩/૩૨)
અગ્નિકોણે દ્વિતીય વિન્દૌ-નકારાય નમઃ- નકારમૈશ્વર્ય સ્વરૂપં પદ્મરાગાચલાકારં આવાહયામિ- ઇતિ મૂલમન્ત્ર દ્વિતીયાક્ષરં નકારમાવાહ્ય સમ્યગર્ચયેત્ ॥ ૮॥

મો ષૂ ણ ઇન્દ્રાત્ર પૃત્સુ દેવૈરસ્તિ હિ ષ્મા તે શુષ્મિન્નવયાઃ ।
મહશ્ચિદસ્ય મીઢુષો યવ્યા હવિષ્મતો મરુતો વન્દતે ગીઃ ॥ (વાજ । યજુ, ૩/૪૬)
દક્ષિણે તૃતીય વિન્દૌ- મોકારાય નમઃ-મોકારં શક્તિ સ્વરૂપમઞ્જનાચલનિભમાવાહયામ્-ઇતિ મૂલમન્ત્ર તૃતીયાક્ષરં મોકારમાવાહ્ય પૂજયેત્ ॥ ૯॥

નાના હિ વાન્દેવહિતં સદસ્કૃતં મા સંસૃક્ષાથાં પરમે વ્યોમન્ ।
સુરા ત્વમસિ શુષ્મિણી સોમ એષ મા મા હિંસીઃ સ્વાં યોનિમાવિશન્તી।(વાજ । યજુ, ૧૯/૭)

નૈરૃત્ય કોણે ચતુર્થ વિન્દૌ -નાકારાય નમઃ-નાકારં બલ સ્વરૂપં કાઞ્ચનાચલનિભમાવાહયામિ-ઇતિ મૂલમન્ત્ર ચતુર્થાક્ષરં નાકારમાવાહ્ય ષોડશોપચારૈઃ પૂજયેત્ ॥ ૧૦॥

રાયા વયં સસવાંસો મદેમ હવ્યેન દેવા યવસેન ગાવઃ । તાં ધેનું મિત્રાવરુણા યુવં નો વિશ્વાહા ધત્તમનપસ્ફુરન્તીમેષ તે યોનિરૃતાયુભ્યાં ત્વા । (ઋક્, ૪/૪૨/૧૦, યજુ, ૭/૧૦)
પશ્ચિમે પઞ્ચમ વિન્દૌ - રાકારાય નમઃ- રાકારં તેજોરૂપં નિર્ધૂમાઙ્ગાર સદૃશમાવાહયામિ- ઇતિ મૂલમન્ત્ર પઞ્ચાક્ષરં રાકારમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૧૧॥

ય આત્મદા બલદા યસ્ય વિશ્વ ઉપાસતે પ્રશિષં યસ્ય દેવાઃ ।
યસ્ય છાયામૃતં યસ્ય મૃત્યુઃ કસ્મૈ દેવાય હવિષા વિધેમ ॥

(ઋક્, ૧૦/૧૨૧/૨, અથર્વ, ૪/૨/૧, ૧૩/3/૨૪, યજુ, ૨૫/૧૩)
વાયવ્ય કોણે ષષ્ઠ વિન્દૌ-યકારાય નમઃ- યકારં વીર્યસ્વરૂપમયસ્કાન્ત સદૃશ માવાહયામિ ઇતિ મૂલમન્ત્ર ષષ્ટાક્ષરમાવાહ્ય સમ્યગર્ચયેત્ ॥ ૧૨॥

પ્રૈતુ વાજી કનિક્રન્નાનદદ્રાસભઃ પત્વા ।
ભરન્નગ્નિં પુરીષ્યં મા પાદ્યાયુષઃ પુરા ।
વૃષાગ્નિં વૃષણં ભરન્નપાં ગર્ભં સમુદ્રિયમ્ ।
અગ્ન આયાહિ વીતયે ।
(યજુ, ૧૧/૪૬॥

ઉત્તરે સપ્તવિન્દૌ-ણાકારાય નમઃ -ણાકારં બલસ્વરૂપમાવાહયામિ - ઇતિ મૂલમન્ત્ર સપ્તમાક્ષરં ણાકારમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૧૩॥

યઃ પ્રાણદો નિમિષતો મહિત્વૈક ઇદ્રાજા જગતો બભૂવ । ય ઈશે અસ્ય દ્વિપદશ્ચતુષ્પદઃ કસ્મૈ દેવાય હવિષા વિધેમ ।
(ઋક્, ૧૦/૧૨૧/3, યજુ, ૨૩/3, ૨૫/૧૧, તૈત્તિરીય સંહિતા, ૪/૧/૮/૪, ૭/૫/૧૬/૧, અથર્વ, ૪/૨/૨)
ઈશાન કોણે અષ્ટમ વિન્દૌ-યકારાય નમઃ-યકારં વીર્ય્યસ્વરૂપમયસ્કાન્ત સદૃશમાવાહયામિ-ઇતિ- નારાયણ મન્ત્રાષ્ટમાક્ષરં યકારમાવાહ્ય પૂર્વોક્ત રીત્યા ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૧૪॥

તતોઽરુણ કેશરેષુ પૂર્વાદિ ક્રમેણ પૂજયેત્ । તદ્યથા-
મનસઃ કામમાકૂતિં વાચઃ સત્યમશીય ।
પશૂનાં રૂપ મન્નસ્ય રસો યશઃ શ્રીઃ શ્રયતાં મયિ સ્વાહા ॥ (વાજ ।
યજુ, ૩૯/૪)
ૐ શ્રીં શ્રિયૈ નમઃ- શ્રિયમાવાહયામિ-ઇતિ પૂર્વ દલીય કેશરેષુ શ્રિયમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૧૫॥

આર્દ્રાં પુઃ (યઃ)કરિણીં પુ (ય)ષ્ટિં સુવર્ણાં હેમમાલિનીમ્ ।
સૂર્યા હિરણ્મયીં લક્ષ્મીં જાતવેદો મ આવહ ॥ (શ્રી સૂક્ત, ૧૪)

ॐ પું પુષ્ટ્યૈ નમઃ- પુષ્ટિમાવાહયામિ- ઇતિ અગ્નિ કોણ દલીય કેશરેષુ સરસ્વતીમાવાહ્ય પૂર્વોક્તરીત્યા સર્વોપચારૈઃ પૂજયેત્ ॥ ૧૭॥

રયિશ્ચ મે રાયશ્ચ મે પુષ્ટં ચ મે પુષ્ટિશ્ચ મે વિભુ ચ મે પ્રભુ ચ મે પૂર્ણં ચ મે પૂર્ણતરં ચ મે કુયવં ચ મેઽક્ષિતં ચ મેઽન્નં ચ મે ક્ષુચ્ચ મે યજ્ઞેન કલ્પન્તામ્ ॥ (યજુ, ૧૮/૧૦)
ॐ પ્રીં પ્રીત્યૈ નમઃ પ્રીતિમાવાહયામિ- ઇતિ નૈરૃત્ય કોણ દલીય કેશરેષુ પ્રીતિમાવાહ્ય ષોડશોપચારૈઃ પૂજયેત્ ॥ ૧૮॥

દ્યૌઃ શાન્તિરન્તરિક્ષં શાન્તિઃ પૃથિવી શાન્તિરાપઃ શાન્તિરોષધયઃ શાન્તિઃ ।
વનસ્પતયઃ શાન્તિર્વિશ્વેદેવાઃ શાન્તિર્બ્રહ્મ શાન્તિઃ સર્વં શાન્તિઃ શાન્તિરેવ શાન્તિઃ સા મા શાન્તિરેધિ ॥ (વાજ । યજુ, ૩૬/૧૭)
ॐ શાં શાન્ત્યૈ નમઃ શાન્તિમાવાહયામિ-ઇતિ- પશ્ચિમ દલીય કેશરેષુ શાન્તિમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૧૯॥

અઙ્ગાન્યાત્મન્ ભિષજા તદશ્વિનાત્માનમઙ્ગૈ સમધાત્સરસ્વતી ।
ઇન્દ્રસ્ય રૂપં શત માનમાયુશ્ચન્દ્રેણ જ્યોતિરમૃતં દધાનાઃ । (વાજ । યજુ, ૧૯/૯૩)
ॐ તું તુષ્ટ્યૈ નમઃ તુષ્ટિમાવાહયામિ-ઇતિ વાયવ્ય કોણ દલીય કેશરેષુ તુષ્ટિમાવાહ્ય સમ્યગર્ચયેત્।૨૦॥

યત્ પ્રજ્ઞાનમુત ચેતો ધૃતિશ્ચ યજ્જ્યોતિરન્તરમૃતં પ્રજાસુ ।
યસ્માન્ન ઋતે કિઞ્ચન કર્મ ક્રિયતે તન્મે મનઃ શિવ સઙ્કલ્પમસ્તુ ॥ (યજુ, ૩૪/૩)
ॐ ક્લીં કાન્ત્યૈ નમઃ કાન્તિમાવાહયામિ-ઇત્યુત્તર દલીય કેશરેષુ કાન્તિમાવાહ્ય સર્વોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૨૧॥

ઉપૈતુ માં દેવસખઃ કીર્તિશ્ચ મણિના સહ । પ્રાદુર્ભૂતોઽસિ (સુ)રાષ્ટ્રેઽસ્મિન્ કીર્તિમૃદ્ધિં દદાતુ મે । (શ્રી સૂક્ત, ૭)
ॐ ક્લીં કીર્ત્યૈ નમઃ કીર્તિમાવાહયામિ-ઇતીશાન કોણ દલીય કેશરેષુ કીર્તિમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૨૨॥

તતઃ સર્વ દલેષુ પૂર્વાદિ ક્રમેણ પૂજયેત્ । તદ્યથા-
મહાલક્ષ્મ્યૈ ચ વિદ્મહે વિષ્ણુપત્ન્યૈ ચ ધીમહિ ।
તન્નો લક્ષ્મી પ્રચોદયાત્ ॥ (લક્ષ્મી સૂક્ત, ૯)
ॐ મહાલક્ષ્મ્યૈ નમઃ મહાલક્ષ્મીમાવાહયામિ -ઇતિ પૂર્વે પ્રથમ દલે મહાલક્ષ્મીમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૨૩॥

શ્રીશ્ચ તે લક્ષ્મીશ્ચ પત્ન્યાવહોરાત્રે પાર્શ્વે નક્ષત્રાણિ રૂપમશ્વિનૌ વ્યાત્તમ્ ।
ઇષ્ણનિષાણમું મ ઇષાણ સર્વલોકં મ ઇષાણ । (યજુ, ૩૧/૨૨)
ॐ વિદ્યાલક્ષ્મ્યૈ નમઃ વિદ્યાલક્ષ્મીમાવાહયામિ-ઇત્યગ્નિ કોણે દ્વિતીય દલે વિદ્યાલક્ષ્મીમાવાહ્ય પૂજોપચારૈઃ સમર્ચયેત્ ॥ ૨૪॥

હિરણ્યવર્ણાં હરિણીં સુવર્ણ રજતસ્રજામ્ ।

ચન્દ્રાં હિરણ્મયીં લક્ષ્મીં જાતવેદો મ આવહ ॥ (શ્રીસૂક્ત, ૧)
ૐ સૌભાગ્યલક્ષ્મ્યૈ નમઃ સૌભાગ્યલક્ષ્મીમાવાહયામિ -ઇતિ દક્ષિણે તૃતીય દલે સૌભાગ્યલક્ષ્મીમાવાહ્ય પૂર્વોક્તોપચારૈઃ પૂજયેત્ ॥ ૨૫॥

પદ્માનને પદ્મ ઊરૂ પદ્માક્ષિ પદ્મસમ્ભવે ।
તન્મે ભજસિ પદ્માક્ષિ યેન સૌખ્યં લભામ્યહમ્ ॥ (શ્રીસૂક્ત, ૧૮)
ૐ અમૃતલક્ષ્મ્યૈ નમઃ અમૃતલક્ષ્મીમાવાહયામિ-ઇતિ નૈરૃત્ય કોણે ચતુર્થ દલે અમૃતલક્ષ્મીમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૨૬॥

અશ્વદાયી ગોદાયી ધનદાયિ મહાધને ।
ધનં મે જુષતાં દેવિ સર્વકામાંશ્ચ દેહિ મે ॥ (શ્રીસૂક્ત, ૧૯)
ૐ કામલક્ષ્મ્યૈ નમઃ કામલક્ષ્મીમાવાહયામિ-ઇતિ પશ્ચિમે પઞ્ચમ દલે કામલક્ષ્મીમાવાહ્ય ષોડશોપચારૈઃ પૂજયેત્ ॥ ૨૭॥

વિષ્ણુપત્નીં ક્ષમાં દેવીં માધવીં માધવપ્રિયામ્ । વિષ્ણુપ્રિયાં (લક્ષ્મીપ્રિય)સખી દેવીં નમામ્યચ્યુતવલ્લભામ્ । (શ્રીસૂક્ત, ૨૫)
ૐ સત્યલક્ષ્મ્યૈ નમઃ સત્યલક્ષ્મીમાવાહયામિ-ઇતિ વાયવ્ય કોણે ષષ્ઠ દલે સત્યલક્ષ્મીમાવાહ્ય સર્વોપચારૈઃ સમર્ચયેત્ ॥ ૨૮॥

તાં મ આવહ જાતવેદો લક્ષ્મીમનપગામિનીમ્ । યસ્ય હિરણ્યં વિન્દેયં ગામશ્વં પુરુષાનહમ્ । (શ્રીસૂક્ત, ૨)
ૐ ભોગલક્ષ્મ્યૈ નમઃ ભોગલક્ષ્મીમાવાહયામિ-ઇત્યુત્તરે સપ્તમ દલે ભોગલક્ષ્મીમાવાહ્ય પુષ્પાદિભિઃ સમર્ચયેત્ ॥ ૨૯॥

તાં મ આવહ જાતવેદો લક્ષ્મીમનપગામિનીમ્ । યસ્ય હિરણ્યં પ્રભૂતં ગાવો દાસ્યોઽશ્વાવિન્દેયં પુરુષાનહમ્ । (શ્રીસૂક્ત, ૧૫)
ૐ યોગલક્ષ્મ્યૈ નમઃ યોગલક્ષ્મીમાવાહયામિ-ઇતીશાન કોણે અષ્ટમ દલે યોગલક્ષ્મીમાવાહ્ય પૂર્વોક્ત રીત્યા ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૩૦॥

તતઃ કૃષ્ણ દલ સન્ધિષુ પૂર્વાદિ ક્રમેણ હરેર્ભૂષણાયુધાનિ પૂજયેત્ । તદ્યથા-
આ તે વત્સો મનો યમત્પરમાચ્ચિત્સધસ્તાત્ । અગ્ને ત્વાં કામયા ગિરા । (યજુ, ૧૨/૧૧૫)
પૂર્વે ૐ શ્રીવત્સાય શ્રીનિવાસાય નમઃ શ્રીવત્સમાવાહયામિ-ઇતિ શ્રીવત્સમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૩૧॥

પરિવાજ પતિઃ કવિરગ્નિર્હવ્યાન્યક્રમીત્ । દધદ્રત્નાનિ દાશુષે । (યજુ, ૧૧/૨૫)
આગ્નેય્યાં ૐ શ્રીકૌસ્તુભાય રત્નાધિપતયે નમઃ શ્રી કૌસ્તુભમાવાહયામિ -ઇતિ શ્રી કૌસ્તુભમાબાહ્ય પુષ્પાદિભિઃ સમર્ચયેત્ ॥ ૩૨॥

કુક્કુટોઽસિ મધુજિહ્વ ઇષમૂર્જમાવદ ત્વયા વયં સઙ્ઘાતં સઙ્ઘાતં જેષ્મ વર્ષ વૃદ્ધમસિ પ્રતિ ત્વા વર્ષવૃદ્ધં વેત્તુ પરાપૂતં રક્ષઃ પરાપૂતા । આરાતયો ઽપહતં રક્ષો વાયુર્વો વિવિનક્તુ દેવો વઃ સવિતા હિરણ્યપાણિઃ પ્રતિગૃભ્ણાત્વચ્છિદ્રેણ પાણિના । (યજુ, ૧/૧૬)
દક્ષિણે ૐ કિરીટાય મુકુટાધિપતયે નમઃ કિરીટમાવાહયામિ-ઇતિ કિરીટમાવાહ્ય પૂજોપચારૈઃ સમ્પૂજયેત્ ॥ ૩૩॥

ઇન્દ્ર આસાં નેતા બૃહસ્પતિર્દક્ષિણા યજ્ઞઃ પુર એતુ સોમઃ ।
દેવસેનાનામભિભઞ્જતીનાં જયન્તીનાં મરુતો યન્ત્વગ્રમ્ ॥ (યજુ, ૧૭/૪૦)
નૈરૃત્યામ્-ઓં વૈજયન્ત્યૈ વનમાલાયૈ નમઃ વૈજયન્તીમાવાહયામિ -ઇતિ વૈજયન્તીમાવાહ્ય સર્વોપચારૈઃ સમર્ચયેત્ ॥ ૩૪॥

ચરણં પવિત્રં વિતતં પુરાણં યેન પૂતસ્તરતિ દુષ્કૃતાનિ ।
તેન પવિત્રેણ શુદ્ધેન પૂતા અતિપાપ્માનમરાતિં તરેમ ॥

(ત્રિપાદ્વિભૂતિ મહાનારાયણોપનિષદ્, ૭/૩, મહાનારાયણોપનિષદ્, ૫/૧૦, સુદર્શન ઉપનિષદ્, ૫)
પશ્ચિમે ૐ સુદર્શનાય હેતિરાજાય નમઃ સુદર્શનમાવાહયામિ -ઇતિ સુદર્શનમાવાહ્ય ષોડશોપચારૈઃ પૂજયેત્ ॥ ૩૫॥

અગ્નિરૃષિઃ પવમાનઃ પાઞ્ચજન્યઃ પુરોહિતઃ । તમીમહે મહાગયમ્ । ઉપયામ ગૃહીતોઽસ્યગ્નયે ત્વા વર્ચસ એષતે યોનિરગ્નયે ત્વા વર્ચસે । (યજુ, ૨૬/૯)
વાયવ્યાં ૐ પાઞ્ચજનાય શઙ્ખાધિપતયે નમઃ પાઞ્ચજન્યમાવાહયામિ-ઇતિ પાઞ્ચજન્યમાવાહ્ય પુષ્પાદિભિઃ સમર્ચયેત્ ॥ ૩૬॥

જિહ્વા મે ભદ્રં વાઙ્ મહો મનો મન્યુઃ સ્વરાડ્ ભામઃ ।
મોદાઃ પ્રમોદા અઙ્ગુલીરઙ્ગાનિ મિત્રં મે સહઃ ॥ (યજુ, ૨૦/૬)
ઉત્તરે ૐ કૌમોદક્યૈ ગદાધિપતયે નમઃ કૌમોદકીમાવાહયામિ -ઇતિ કૌમોદકીમાવાહ્ય પૂર્વોક્ત રીત્યા પૂજયેત્ ॥ ૩૭॥

સૌરી બલાકા શાર્ગઃ સૃજયઃ શયાણ્ડકસ્તે મૈત્રાઃ સરસ્વત્યૈ શારિઃ પુરુષવાક્ શ્વાવિદ્ ભૌમી શાર્દૂલો વૃકઃ પૃદાકુસ્તે મન્યવે સરસ્વતે શુકઃ પુરુષવાક્ ॥ (યજુ, ૨૪/૩૩)
ઈશાન્યાં ૐ શાર્ઙ્ગાય ચાપાધિપતયે નમઃ શાર્ઙ્ગમાવાહયામિ-ઇતિ શાએઙ્ગમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૩૮॥

તતઃ શુક્લ પ્રથમ નાભૌ-
ઇદં વિષ્ણુર્વિચક્રમે ત્રેધા નિદધે પદમ્ । સમૂળ્હમસ્ય પાંસુરે । સ્વાહા (યજુ, ૫/૧૫)
ૐ વિષ્ણવે નમઃ વિષ્ણુમાવાહયામિ-ઇતિ વિષ્ણુમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૩૯॥

પીત દ્વિતીય નાભૌ-

બ્રહ્મ જજ્ઞાનં પ્રથમં પુરસ્તા દ્વિસીમતઃ સુરુચો વેન આવઃ । સ બુધ્ન્યા ઉપમાઽસ્યવિષ્ઠાઃ સતશ્ચ યોનિમસશ્ચ વિ વઃ । (યજુ, ૧૩/૩)
ૐ બ્રહ્મણે નમઃ બ્રહ્માણમાવાહયામિ -ઇતિ બ્રહ્માણમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૪૦॥

પાટલ તૃતીય નાભૌ-
ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ । ઉર્વારુકમિવ બન્ધનાન્ મૃત્યોર્મુક્ષીય મામૃતાત્ (યજુ, ૩/૬૦)
ૐ ત્ર્યમ્બકાય નમઃ ત્ર્યમ્બકમાવાહયામિ -ઇતિ ત્ર્યમ્બકમાવાહ્ય ષોડશોપચારૈઃ પૂજયેત્ ॥ ૪૧॥

તતોઽરુણ દ્વાદશારેષુ પૂર્વાદિ ક્રમેણ કેશવાદિ દ્વાદશ મૂર્તીન્ પૂજયેત્ । તદ્યથા-
યુક્ષ્વા હિ કેશિના હરી વૃષણા કક્ષ્યપ્રા । અથા ન ઇન્દ્ર સોમપા ગિરામુપશ્રુતી ચર । ઉપયામ ગૃહીતોઽસીન્દ્રાય ત્વા ષોડશિન એષ તે યોનિરિન્દ્રાય ત્વા ષોડશિને । (યજુ, ૮/૩૪)
ૐ કેશવાય નમઃ કેશવમાવાહયામિ -ઇતિ પ્રથમારે કેશવમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૪૨॥

નારાયણાય વિદ્મહે વાસુદેવાય ધીમહિ । તન્નો વિષ્ણુઃ પ્રચોદયાત્ । (તૈત્તિરીય આરણ્યક,૧૦/૧૫)
ૐ નારાયણાય નમઃ નારાયણમાવાહયામિ -ઇતિ દ્વિતીયારે નારાયણમાવાહ્ય પૂજોપચારૈઃ સમર્ચયેત્ ॥ ૪૩॥

મધવે સ્વાહા માધવાય સ્વાહા શુક્રાય સ્વાહા શુચયે સ્વાહા નભસે સ્વાહા નભસ્યાય સ્વાહેષાય સ્વાહોર્જાય સ્વાહા સહસે સ્વાહા સહસ્યાય સ્વાહા તપસે સ્વાહા તપસ્યાય સ્વાહા અંહસ્પતયે સ્વાહા । (યજુ, ૨૨/૩૧)
ૐ માધવાય નમઃ માધવમાવાહયામિ -ઇતિ તૃતીયારે માધવમાવાહ્ય પુષ્પાદિભિઃ પૂજયેત્ ॥ ૪૪॥

ગોત્રભિદં ગોવિદં વજ્રબાહું જયન્તમજ્મ પ્રમૃણન્તમોજસા । ઇમં સજાતા અનુ વીરયધ્વમિન્દ્રં સખાયો અનુ સં રભધ્વમ્ । (યજુ, ૧૭/૩૮)
ૐ ગોવિન્દાય નમઃ ગોવિન્દમાવાહયામિ-ઇતિ ચતુર્થારે ગોવિન્દમાવાહ્ય પુષ્પાદિભિઃ પૂજયેત્ ॥ ૪૫॥

વિષ્ણોઃ કર્માણિ પશ્યત યતો વ્રતાનિ પસ્પશે । ઇન્દ્રસ્ય યુજ્યઃ સખા ।
(ઋક્, ૧/૨૨/૧૯, વાજ । યજુ, /૪, ૧૩/૩૩, તૈત્તિરીય સંહિતા, ૧/૩/૬/૨, અથર્વ, ૭/૨૬/૬)
ૐ વિષ્ણવે નમઃ વિષ્ણુમાવાહયામિ-ઇતિ પઞ્ચમારે વિષ્ણુમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૪૬॥

મધુ વાતા ઋતાયતે મધુ ક્ષરન્તિ સિન્ધવ ।
માધ્વીર્નઃ સન્ત્વોષધીઃ ॥

(ઋક્, ૧/૯૦/૬, યજુ, ૧૩/૨૭, તૈત્તિરીય સંહિતા, ૪/૨/૯/૩, તૈત્તિરીય આરણ્યક, ૧૦/૧૦/૨, શતપથ બ્રાહ્મણ, ૧૪/૯/૩/૧૧)
ૐ મધુસૂદનાય નમઃ મધુસૂદનમાવાહયામિ -ઇતિ ષષ્ઠારે મધુસૂદનમાવાહ્ય પૂર્વોક્ત રીત્યા સમર્ચયેત્ ॥ ૪૭॥

દિવિ વિષ્ણુર્વ્યક્રંસ્ત જાગતેન છન્દસા તતો નિર્ભક્તો યોઽસ્માન્દ્વેષ્ટિ યં ચ વયં દ્વિષ્મો ઽન્તરિક્ષે વિષ્ણુર્વ્યક્રંસ્ત ત્રૈષ્ટુભેન છન્દસા તતો નિર્ભક્તો યોઽસ્માન્દ્વેષ્ટિ યં ચ વયં દ્વિષ્મઃ પૃથિવ્યાં વિષ્ણુર્વ્યક્રંસ્ત ગાયત્રેણ ચન્દસા તતો નિર્ભક્તો યોઽસ્માન્દ્વેષ્ટિ યં ચ વયં દ્વિષ્મોઽસ્માદન્નદસ્યૈ પ્રતિષ્ઠાયા અગન્મ સ્વઃ સઞ્જ્યોતિષા ભૂમ । (યજુ, ૨/૨૫)

ૐ ત્રિવિક્રમાય નમઃ ત્રિવિક્રમમાવાહયામિ-ઇતિ સપ્તમારે ત્રિવિક્રમમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૪૮॥

નમો હ્રસ્વાય ચ વામનાય ચ નમો બૃહતે ચ વર્ષીયસે ચ નમો વૃદ્ધાય ચ સવૃધે ચ નમોઽગ્ર્યાય ચ પ્રથમાય ચ । (યજુ, ૧૬/૩૦)
ૐ વામનાય નમઃ વામનમાવાહયામિ-ઇતિ અષ્ટમારે વામનમાવાહ્ય પુષ્પાદિભિઃ સમર્ચયેત્।૪૯॥

દૈવ્યાય ધર્ત્રે જોષ્ટ્રે દેવશ્રીઃ શ્રીમનાઃ શતપયાઃ । પરિગૃહ્ય દેવા યજ્ઞમાયન્ દેવા દેવેભ્યો અધ્વર્યન્તો અસ્થુઃ । (યજુ, ૧૭/૫૬)
ૐ શ્રીધરાય નમઃ શ્રીધરમાવાહયામિ-ઇતિ નવમારે શ્રીધરમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૫૦॥

પુરુષ મૃગશ્ચન્દ્રમસો ગોધા કાલકા દાર્વાઘાટસ્તે વનસ્પતીનાં કૃકવાકુઃ સાવિત્રો હંસો વાતસ્ય નાક્રો મકર કુલીપયસ્તે ઽકૂપારસ્ય હ્રિયૈ શલ્યકઃ । (યજુ, ૨૪/૩૫)
ૐ હૃષીકેશાય નમઃ હૃષીકેશમાવાહયામિ -ઇતિ દશમારે હૃષીકેશમાવાહ્ય પૂર્વોક્ત રીત્યા સમર્ચયેત્ ॥ ૫૧॥

નાભિર્મે ચિત્તં વિજ્ઞાનં પાયુર્મે ઽપચિતિર્ભસત્ । આનન્દનન્દાવાણ્ડૌ મે ભગઃ સૌભાગ્યં પસઃ । જઙ્ઘાભ્યાં પદ્ભ્યાં ધર્મોઽસિ વિશિ રાજા પ્રતિષ્ઠિતઃ । (યજુ, ૨૦/૯)
ૐ પદ્મનાભાય નમઃ પદ્મનાભમાવાહયામિ -ઇતિ એકાદશારે પદ્મનાભમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૫૨॥

યદ્વાજિનો દામ સન્દામર્વતો યા શીર્ષણ્યા રશના રજ્જુરસ્ય ।
યદ્વા ઘાસ્ય પ્રભૃતમાસ્યે તૃણં સર્વા તા તે અપિ દેવેષ્વસ્તુ ॥

(ઋક્, ૧/૧૬૨/૮, યજુ, ૨૫/૩૧, તૈત્તિરીય સંહિતા, ૪/૬/૮/૩)
ૐ દામોદરાય નમઃ દામોદરમાવાહયામિ-ઇતિ દ્વાદશારે દામોદરમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૫૩॥

તતઃ કૃષ્ણ દ્વાદશાર સન્ધિષુ પૂર્વાદિ ક્રમેણ મત્સ્યં કૂર્મં વરાહં નૃસિંહં વામનં પરશુરામં રામં તદ્ ભ્રાતૃન્ કૃષ્ણં સભ્રાતરં કલ્કિનઞ્ચ પૂજયેત્ । તદ્યથા-
હંશઃ શુચિષદ્વસુરન્તરિક્ષસદ્ધોતા વેદિષદતિથિર્દુરોણસત્ ।
નૃષદ્વરસદ્ ઋતસદ્ વ્યોમસદબ્જા ગોજા ઋતજા અદ્રિજા ઋતં (બૃહત્)॥

(ઋક્, ૪/૪૦/૫, યજુ, ૧૦/૨૪, ૧૨/૧૪, તૈત્તિરીય સંહિતા, ૧/૮/૧૫/૨, તૈત્તિરીય આરણ્યક, ૧૦/૧૦/૨)
ૐ મત્સ્યાય નમઃ મત્સ્યમાવાહયામિ -ઇતિ પ્રથમાર સન્ધૌ મત્સ્યમાવાહ્ય ષોડશોપચારૈઃ સમર્ચયેત્ ॥ ૫૫॥

ખઙ્ગો વૈશ્વદેવઃ શ્વા કૃષ્ણઃ કર્ણો ગર્દભસ્તરક્ષુસ્તે રક્ષસામિન્દ્રાય સૂકરઃ સિંહો મારુતઃ કૃકલાસઃ પિપ્પકાશકુનિસ્તેરવ્યાયૈ વિશ્વેષાં દેવાનાં પૃષતઃ ॥ (યજુ, ૨૪/૪૦)
ૐ વરાહાય નમઃ વરાહમાવાહયામિ -ઇતિ વરાહમાવાહ્ય પૂર્વોક્ત રીત્યા પૂજયેત્ ॥ ૫૬॥

પ્ર તદ્વિષ્ણુસ્તવતે વીર્યેણ મૃગો ન ભીમઃ કુચરો ગિરિષ્ઠાઃ ।
યસ્યોરુષુ ત્રિષુ વિક્રમણેષ્વધિક્ષયન્તિ ભુવનાનિ વિશ્વા ॥ (યજુ, ૫/૨૦)

ॐ નૃસિંહાય નમઃ નૃસિંહમાવાહયામિ -ઇતિ ચતુર્થ સન્ધૌ નૃસિંહમાવાહ્ય પુષ્પાદિભિઃ સમર્ચયેત્ ॥ ૫૭॥

નમો હ્રસ્વાય ચ વામનાય ચ નમો બૃહતે ચ વર્ષીયસે । નમો વૃદ્ધાય ચ સવૃધે ચ નમોઽગ્ર્યાય ચ પ્રથમાય ચ । (યજુ, ૧૬/૩૦)
ॐ વામનાય નમઃ વામનમાવાહયામિ-ઇતિ પઞ્ચમાર સન્ધૌ વામનમાવાહ્ય પૂજયેત્ ॥ ૫૮॥

અપિબત કદ્રુવઃ સુતમિન્દ્રઃ સહસ્રબાહ્વે । અત્રાદેદિષ્ટ પૌંસ્યમ્ । (ઋક્, ૮/૪૫/૨૬, સામ, ૧૩૧)
ॐ પરશુરામાય નમઃ પરશુરામમાવાહયામિ -ઇતિ ષષ્ઠાર સન્ધૌ પરશુરામમાવાહ્ય પુષ્પાદિભિઃ પૂજયેત્ ॥ ૫૯॥

ભદ્રો ભદ્રયા સચમાન આગાત્ સ્વસારં જારો અભ્યેતિ પશ્ચાત્ ।
સુપ્રકેતૈર્દ્યુભિરગ્નિર્વિતિષ્ઠન્ રુશદ્ભિર્વર્ણૈરભિ રામમસ્થાત્ ॥ (ઋક્, ૧૦/૩/૩, સામ, ૧૫૪૮)
ॐ રામાય નમઃ રામમાવાહયામિ -ઇતિ સપ્તમાર સન્ધૌ રામમાવાહ્ય ષોડશોપચારૈઃ પૂજયેત્ ॥ ૬૦॥

વિષ્ણો રરાટમસિ વિષ્ણોઃ શ્નપ્ત્રે સ્થો વિષ્ણોઃ સ્યૂરસિ ।
વિષ્ણોર્ધ્રુવોઽસિ ।
વૈષ્ણવમસિ વિષ્ણવે ત્વા ॥ (યજુ, ૫/૨૧)
ॐ લક્ષ્મણાય નમઃ લક્ષ્મણમાવાહયામિ-ઇત્યષ્ટમારસન્ધૌ લક્ષ્મણમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૬૧॥

તદ્વિષ્ણોઃ પરમં પદં સદા પશ્યન્તિ સૂરયઃ ।
દિવીવ ચક્ષુરાતતમ્ ॥

(ઋક્, ૧/૨૨/૨૦, સામ, ૧૬૭૨, અથર્વ, ૭/૨૬/૭, યજુ, ૬/૫, તૈત્તિરીય સંહિતા, ૧/૩/૬/૨, ૪/૨/૯/૩)
ॐ ભરતાય નમઃ ભરતમાવાહયામિ-ઇતિ નવમારસન્ધૌ ભરતમાવાહ્ય પૂજોપચારૈઃ સમર્ચયેત્ ॥ ૬૨॥

વિષ્ણોઃ કર્માણિ પશ્યત યતો વ્રતાનિ પસ્પશે ।
ઇન્દ્રસ્ય યુજ્યઃ સખા ॥

(ઋક્, ૧/૨૨/૧૯, સામ, ૧૬૭૧, યજુ, ૬/૪, ૧૩/૩૩, તૈત્તિરીય સંહિતા, ૧/૩/૬/૨)
ॐ શત્રુઘ્નાય નમઃ શત્રુઘ્નમાવાહયામિ-ઇતિ દશમારસન્ધૌ શત્રુઘ્નમાવાહ્ય પૂજયેત્ ॥ ૬૩॥

કૃષ્ણં ત એમ રુશતઃ પુરો ભાશ્ચરિષ્ણ્વર્ચિર્વપુષામિદેકમ્ ।
યદ પ્રવીતા દધતે હ ગર્ભં સદ્યશ્ચિજ્જાતો ભવસીદુ દૂતઃ ॥ (ઋક્, ૪/૭/૯)
ॐ સભ્રાત્રે કૃષ્ણાય નમઃ સભ્રાતરં કૃષ્ણમાવાહયામિ-ઇત્યેકાદશારસન્ધૌ સભ્રાતરં કૃષ્ણમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૬૪॥

રૂપં રૂપં પ્રતિરૂપો બભૂવ તદસ્ય રૂપં પ્રતિચક્ષણાય ।
ઇન્દ્રો માયાભિઃ પુરુરૂપ ઈયતે યુક્તા હ્યસ્ય હરયઃ શતાદશ ॥ (ઋક્, ૬/૪૭/૧૮)
ॐ કલ્કિને નમઃ કલ્કિમાવાહયામિ-ઇતિ દ્વાદશારસન્ધૌ કલ્કિનમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૬૫॥

તતઃ પ્રથમ નેમિ વલયે પૂર્વાદિ ક્રમેણ શઙ્ખં ચક્રં ગદાં શાર્ઙ્ગ મુસલં બાણં પાશં ચ પૂજયેત્ । તદ્યથા-
અગ્નિરૃષિઃ પવમાનઃ પાઞ્ચજન્યઃ પુરોહિતઃ તમીમહે મહાગયમ્ । (યજુ, ૨૬/૯)
ૐ પાઞ્ચજન્યાય શઙ્ખાધિપતયે નમઃ પાઞ્ચજન્ય શઙ્ખમાવાહયામિ-ઇતિ પૂર્વે પાઞ્ચજન્ય શઙ્ખમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૬૬॥

ચરણં પવિત્રં વિતતં પુરાણં યેન પૂતસ્તરતિ દુષ્કૃતાનિ ।
તેન પવિત્રેણ શુદ્ધેન પૂતા અતિ પાપ્માનમરાતિં તરેમ ॥

(ત્રિપાદ્વિભૂતિ મહાનારાયણ ઉપનિષદ્, ૭/૩)
ૐ સુદર્શનાય હેતિરાજાય નમઃ સુદર્શનમાવાહયામિ -ઇત્યગ્નિકોણે ચક્રમાવાહ્ય સમર્ચયેત્ ॥ ૬૭॥

ભીમાનીતે આયુધા તિગ્માનિ ધૂર્વણે ॥ (ઋક્, ૮/૨૯/૫, ૮/૯૬/૯)
ૐ કૌમોદક્યૈ ગદાધિપતયે નમઃ ।
કૌમોદકી ગદામાવાહયામિ-ઇતિ દક્ષિણે કૌમોદકી ગદામાવાહ્ય પૂજયેત્ ॥ ૬૮॥

યે તીર્થાનિ પ્રચરન્તિ સૃકા હસ્તા નિષઙ્ગિણઃ ।
તેષાં સહસ્ર યોજનેઽવ ધન્વાનિ તન્મનસિ ॥ (યજુ, ૧૬/૬૧)
ૐ નન્દકાય ખડ્ગાધિપતયે નમઃ નન્દક ખડ્ગમાવાહયામિ -ઇતિ નૈરૃત્યે નન્દક ખડ્ગમાવાહ્ય સમર્ચયેત્ ॥ ૬૯॥

યા તે હેતિર્મીઢુષ્ટમ હસ્તે બભૂવ તે ધનુઃ ।
તયાઽસ્માન્વિશ્વતસ્ત્વમયક્ષ્મયા પરિ ભુજ ॥(યજુ, ૧૬/૧૧)
ૐ શાર્ઙ્ગાય ચાપાધિપતયે નમઃ શાર્ઙ્ગધનુરાવાહયામિ -ઇતિ પશ્ચિમે શાર્ઙ્ગધનુરાવાહ્ય પૂજયેત્ ॥ ૭૦॥

નમસ્ત આયુધાયાનાતતાય ધૃષ્ણવે ।
ઉભાભ્યામુત તે નમો બાહુભ્યાં તવ ધન્વને ॥ (યજુ, ૧૬/૧૪)
ૐ મુસલાય નમઃ મુસલમાવાહયામિ-ઇતિ વાયવ્યે મુસલમાવાહ્ય સમર્ચયેત્ ॥ ૭૧॥

વિજ્યં ધનુઃ કપર્દિનો વિશલ્યો બાણવાઁ ઉત ।
અનેશન્નસ્ય યા ઇષવ આભુરસ્ય નિષઙ્ગધિઃ ॥ (યજુ, ૧૬/૧૦)
ૐ બાણાય નમઃ બાણમાવાહયામિ -ઇત્યુત્તરે બાણમાવાહ્ય પૂજયેત્ ॥ ૭૨॥

યે તે શતં વરુણ યે સહસ્રં યજ્ઞિયાઃ પાશા વિતતા મહાન્તઃ ।
તેભિર્નો અદ્ય સવિતોત વિષ્ણુર્વિશ્વે મુઞ્ચન્તુ મરુતઃ સ્વર્કાઃ ॥

(કૌષીતકિ શ્રૌત સૂત્ર, ૨૫/૧/૧૧૧, આપસ્તમ્બ શ્રૌત સૂત્ર, ૩/૧૩/૧, કૌશિક સૂત્ર, ૭/૮, પારસ્કર ગૃહ્ય સૂત્ર, ૧/૨/૮)
ૐ પાશાય નમઃ પાશમાવાહયામિ-ઇતીશાન કોણે પાશમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૭૩॥

તતઃ પીઠસ્ય ચતુષ્કોણેષુ આગ્નેયાદિ ક્રમે વરાહં નૃસિંહં અનન્તં હયગ્રીવં ચેતિ ચતુર્મૂર્તીઃ પૂજયેત્ । તદ્યથા-
પ્ર કાવ્યમુશનેવ બ્રુવાણો દેવો દેવાનાં જનિમા વિવક્તિ ।

મહિવ્રતઃ શુચિબન્ધુઃ પાવકઃ પદા વરાહો અભ્યેતિ રેભન્ ॥

(ઋક્, ૯/૯૭/૭, સામવેદ, ૫૨૪, ૧૧૧૬)
પીઠાગ્નિ કોણે-ઓં વરાહાય ધરણીધરાય નમઃ વરાહમાવાહયામિ-ઇતિ વરાહમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૭૪॥

પ્ર તદ્વિષ્ણુઃ સ્તવતે વીર્યેણ મૃગો ન ભીમઃ કુચરો ગિરિષ્ઠાઃ ।
યસ્યોરુષુ ત્રિષુ વિક્રમણેષ્વધિક્ષિયન્તિ ભુવનાનિ વિશ્વા ॥

(ઋક્ । ૧/૧૫૪/૨, અથર્વ, ૭/૨૬/૨-૩, તૈત્તિરીય બ્રાહ્મણ, ૨/૪/૩/૪, યજુ, ૫/૨૦)
પીઠ નૈરૃત્ય કોણે-ઓં નૃસિંહાય વજ્રનખાય નમઃ નૃસિંહમાવાહયામિ-ઇતિ નૃસિંહમાવાહ્ય સર્વોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૭૫॥

વિ ચક્રમે પૃથિવીમેષ એતાં ક્ષેત્રાય વિષ્ણુર્મનુષે દશસ્યન્ ।
ધ્રુવાસો અસ્ય કીરયો જનાસ ઉરુક્ષિતિં સુજનિમા ચકાર ॥

(ઋક્, ૭/૧૦૦/૪, તૈત્તિરીય બ્રાહ્મણ, ૨/૪/૩/૫)
પીઠ વાયવ્ય કોણે-ઓં અનન્તાય નાગરાજાય સહસ્રફણાશોભિતાય નમઃ અનન્તમાવાહયામિ-ઇત્યનન્તમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૭૬॥

હયો ન વિદ્વાઁ અયુજિ સ્વયં ધુરિ તાં વહામિ પ્રતરણીમવસ્યુવમ્ ।
નાસ્યા વશ્મિ વિમુચં નાવૃતં પુનર્વિદ્વાન્ પથઃ પુર એત ઋજુનેષતિ ॥ (ઋક્, ૫/૪૬/૧)
પીઠેશાન કોણે-ઓં હયગ્રીવાય સર્વવિદ્યાધરાય નમઃ હયગ્રીવમાવાહયામિ-ઇતિ હયગ્રીવમાવાહ્ય સર્વોપચારૈઃ સમ્પૂજ્ય પ્રનમેત્ ॥ ૭૭॥

તતઃ શુક્લ વીથ્યાં પૂર્વાદિ ક્રમેણ ઇન્દ્રાગ્નિ-યમ-નિરૃતિ-વરુણ-સોમેશાનાન્ ક્રમેણ પૂજયેત્ । તદ્યથા-
ત્રાતારમિન્દ્રમવિતારમિન્દ્રં હવે હવે સુહવં શૂરમિન્દ્રમ્ ।
હ્વયામિ શક્રં પુરુહૂતમિન્દ્રં સ્વસ્તિ નો મઘવા ધાત્વિન્દ્રઃ ॥

(ઋક્, ૬/૪૭/૧૧, સામ, ૩૩૩, અથર્વ, ૭/૮૬/૧, યજુ, ૨૦/૫૦, તૈત્તિરીય સંહિતા, ૧/૬/૧૨/૫)
પૂર્વે-ઓં ઇન્દ્રાય દેવરાજાય નમઃ ઇન્દ્રમાવાહયામિ-ઇતીન્દ્રમાવાહ્ય અર્ઘ્ય-પાદ્યા-ચમન-સ્નાન-વસ્ત્રો-પવીત-ગન્ધ-પુષ્પ-ધૂપ-દીપ નૈવેદ્ય દક્ષિણાદિભિઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૭૮॥

ત્વં નો અગ્ને વરુણસ્ય વિદ્વાન્ દેવસ્ય હેડો અવ યાસિસીષ્ઠાઃ ।
યજિષ્ઠો વહ્નિતમઃ શોશુચાનો વિશ્વા દ્વેષાંસિ પ્ર મુમુગ્ધ્યસ્મત્ ॥ (યજુ, ૨૧/૩)
અગ્નિ કોણે-ઓં અગ્નયે તેજોઽધિપતયે નમઃ અગ્નિમાવાહયામિ-ઇત્યગ્નિમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૭૯॥

યમાય ત્વાઽઙ્ગિરસ્વતે પિતૃમતે સ્વાહા ।

સ્વાહા ધર્માય સ્વાહા ધર્મઃ પિત્રે ॥ (યજુ, ૩૮/૯)
દક્ષિણે-ઓં યમાય પ્રેતરાજાય નમઃ યમમાવાહયામિ-ઇતિ યમમાવાહ્ય સર્વોપચારૈઃ સમર્ચયેત્ ॥ ૮૦॥

અસુન્વન્તમયજમાનમિચ્છ સ્તેનસ્યેત્યા મન્વિહિ તસ્કરાય ।
અન્યમસ્મદિચ્છ સા ત ઇત્યા નમો દેવિ નૃતે તુભ્યમસ્તુ ॥ (યજુ, ૧૨/૬૨)
નૈરૃત્ય કોણે-ઓં નિરૃતયે ભૂતાધિપતયે નમઃ નિરૃતિનાવાહયામિ-ઇતિ નિરૃતિમાવાહ્ય પૂર્વોક્ત રીત્યા પૂજયેત્ ॥ ૮૧॥

વરુણસ્યોત્તમ્ભનમસિ વરુણસ્ય સ્કમ્ભ સર્જનીસ્થો વરુણસ્ય ઋતસદન્યસિ વરુણસ્ય ઋતસદનમસિ વરુણસ્ય ઋતસદનમાસીદ ॥ (યજુ । ૪/૩૬)
પશ્ચિમે-ઓં વરુણાય જલાધિપતયે નમઃ વરુણમાવાહયામિ-ઇતિ વરુણમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૮૨॥

આ નો નિયુદ્‌ભિઃ સતિનીભિરધ્વરં સહસ્રિણીભીરુપયાહિ યજ્ઞમ્ ।
વાયો અસ્મિન્ત્સ્વને માદયસ્વ યૂયં પાત સ્વસ્તિભિઃ સદા નઃ ॥ (યજુ, ૨૭/૨૮)
વાયવ્ય કોણે-ઓં વાયવે પ્રાણાધિપતયે નમઃ વાયુમાવાહયામિ-ઇતિ વાયુમાવાહ્ય ષોડશોપચારૈઃ સમર્ચયેત્ ॥ ૮૩॥

સોમો ધેનું સોમો અર્વન્તમાશું વીરં કર્મણ્યં દદાતિ ।
સાદન્યં વિદથ્યં સભેયં પિતૃશ્રવણં યો દદાશસ્મૈ ॥ (યજુ, ૩૪/૨૧)
ઉત્તરે-ઓં સોમાય પીયૂષાધિપતયે નમઃ સોમમાવાહયામિ-ઇતિ સોમમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૮૪॥

તમીશાનં જગતસ્થુષસ્પતિં ધિયં જિન્વમવસે હૂમહે વયમ્ ।
પૂષા નો યથા વેદસામસદ્ વૃધે રક્ષિતા પાયુરદબ્ધઃ સ્વસ્તયે ॥ (યજુ, ૨૫/૧૮)
ઈશાન કોણે-ઓં ઈશાનાય વિદ્યાધિપતયે નમઃ ઈશાનમાવાહયામિ-ઇતીશાનમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૮૫॥

તતઃ ચતુર્દ્વારિષુ ચણ્ડ પ્રચણ્ડૌ પૂર્વદ્વારે, ભદ્ર સુભદ્રૌ દક્ષિણ દ્વારે, જય વિજયૌ પશ્ચિમ દ્વારે, ધાતૃ વિધાતારૌ ઉત્તર દ્વારે પૂજયેત્ । તદ્યથા-
આશુઃ શિશાનો વૃષભો ન ભીમો ઘનાઘનઃ ક્ષોભણશ્ચર્ષણીનામ્ ।
સઙ્ક્રન્દનોઽનિમિષ એકવીરઃ શતં સેના અજયત્ સાકમિન્દ્રઃ ॥

(ઋક્, ૧૦/૧૦૩/૧, સામ, ૧૮૪૯, અથર્વ, ૧૯/૧૩/૨, વાજ । યજુ, ૧૭/૩૩, તૈત્તિરીય સંહિતા, ૪/૬/૪/૧)
શ્વેત પૂર્વ દ્વારે-ઓં ચણ્ડાય નમઃ ચણ્ડમાવાહયામિ -ઇતિ ચણ્ડમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૮૬॥

પથસ્પથઃ પરિપતિં વચસ્યા કામેન કૃતો અભ્યાનળર્કમ્ ।
સ નોરાસચ્છુરુધશ્ચન્દ્રાગ્રા ધિયં ધિયં સીષધાતિ પ્ર પૂષા ॥

(ઋક્, ૬/૪૯/૮, યજુ, ૩૪/૪૨, તૈત્તિરીય સંહિતા, ૧/૧/૧૪/૨)

ૐ પ્રચણ્ડાય નમઃ પ્રચણ્ડમાવાહયામિ-ઇતિ દ્વિતીયં પ્રચણ્ડમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૮૭॥

ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવા ભદ્રં પશ્યે માક્ષભિર્યજત્રાઃ ।
સ્તિરઙ્ગૈ સ્તુષ્ટુવાંસસ્તનૂ ભિર્વ્યશેમ દેવહિતં યદાયુઃ ॥

અરુણ દક્ષિણ દ્વારે-ઓં ભદ્રાય નમઃ ભદ્રમાવાહયામિ-ઇતિ પ્રથમં ભદ્રમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૮૮॥

ભદ્રં ભદ્રં ન આભરેષમૂર્જં શતક્રતો । યદિન્દ્ર મૃળયાસિ નઃ । (ઋક્, ૮/૯૩/૨૮, સામ, ૧૭૩)
ૐ સુભદ્રાય નમઃ સુભદ્રમાવાહયામિ -ઇતિ સુભદ્રમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૮૯॥

સઙ્ક્રન્દનેનાનિમિષેણ જિષ્ણુના યુત્કારેણ દુશ્ચ્યવનેન ધૃષ્ણુના ।
તદિન્દ્રેણ જયત તત્સહધ્વં યુધો નર ઇષુ હસ્તેન વૃષ્ણા ॥ (યજુ, ૧૭/૩૪)
પીત પશ્ચિમ દ્વારે-ઓં જયાય નમઃ જયમાવાહયામિ-ઇતિ પ્રથમં જયમાવાહ્ય સર્વોપચારૈઃ સમર્ચયેત્ ॥ ૯૦॥

વિજ્યં ધનુઃ કપર્દિનો વિશલ્યો બાણવાઁ ઉત ।
અનેશન્નસ્ય યા ઇષવ આભુરસ્ય નિષઙ્ગધિઃ ॥

ૐ વિજયાય નમઃ વિજયમાવાહયામિ-ઇતિ વિજયમાહ્વાય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૯૧॥

ધાતા રાતિઃ સવિતેદં જુષન્તાં પ્રજાપતિર્નિધિપા દેવો અગ્નિઃ ।
ત્વષ્ટા વિષ્ણુઃ પ્રજયા સંરરાણા યજમાનાય દ્રવિણં દધાત સ્વાહા ॥ (વાજ યજુ, ૮/૧૭)
કૃષ્ણોત્તર દ્વારે-ઓં ધાત્રે નમઃ ધાતારમાવાહયામિ-ઇતિ પ્રથમં ધાતારમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૯૨॥

સ નો બન્ધુર્જનિતા સ વિધાતા ધામાનિ વેદ ભુવનાનિ વિશ્વા ।
યત્ર દેવા અમૃતમાનશાનાસ્તૃતીયે ધામન્નધ્યૈરયન્ત ॥ (યજુ, ૩૨/૧૦)
ૐ વિધાત્રે નમઃ વિધાતારમાવાહયામિ-ઇતિ દ્વિતીયં વિધાતારમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૯૩॥

તતો વીથ્યા ઈશાનાદિ કોણેષુ પ્રદક્ષિણા ક્રમેણ વિષ્વક્સેનં પૂજયેત્ । તદ્યથા-
ચમૂષચ્છ્યેનઃ શકુનો વિભૃત્વા ગોવિન્દુર્દ્રપ્સ આયુધાનિ બિભ્રત્ ।
અપામૂર્મિં સચમાનઃ સમુદ્રં તુરીયં ધામ મહિષો વિવક્તિ ॥ (ઋક્, ૯/૯૬/૧૯, સામ, ૧૧૭૭)
વીથીશાન કોણે-ઓં વિષ્વક્સેનાય સૂત્રવતી સખાય નમઃ વિષ્વક્સેનમાવાહયામિ-ઇતિ વિષ્વક્સેનમાવાહ્ય સર્વોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૯૪॥

વિશ્વકર્મન્ હવિષા વર્ધનેન ત્રાતારમિન્દ્રકૃણોરવધ્યમ્ ।
તસ્મૈ વિશઃ સમનમન્ત પીર્વીરય મૃગો વિહવ્યો યથાસત્ ॥ (યજુ, ૧૭/૨૪)
વીથ્યગ્નિ કોણે-ઓં વિષ્વક્સેનાય નમઃ વિષ્વક્સેનમાવાહયામિ-ઇતિ વિષ્વક્સેનમાવાહ્ય પૂર્વોક્ત રીત્યા સમ્પૂજ્ય પ્રણમેત્ ॥ ૯૫॥

વિશ્વકર્મન્ હવિષા વાવૃધાનઃ સ્વયં યજસ્વ પૃથિવીમુત દ્યામ્ ।

મુહ્યન્ત્વયે અભિતઃ સપત્ના ઇહાસ્માકં મઘવા સૂરિરસ્તુ ॥

(ઋક્, ૧૦/૮૧/૬, સામ, ૧૫૮૯, યજુ, ૧૭/૨, તૈત્તિરીય સંહિતા, ૪/૬/૨/૬)
વીથિકાગ્નિ કોણે-ઓં સેનેશાય નમઃ સેનેશમાવાહયામિ-ઇતિ સેનેશમાવાહ્ય સર્વોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૯૬॥

યા તે ધામાનિ પરમાણિ યાવમા યા મધ્યમા વિશ્વકર્મન્નુતેમા ।
શિક્ષા સખિભ્યો હવિષિ સ્વધાવઃ સ્વયં યજસ્વ તન્વં વૃધાનઃ ॥

(ઋક્, ૧૦/૮૧/૫, યજુ, ૧૭/૨૧, તૈત્તિરીય સંહિતા, ૪/૬/૨/૫)
વીથિકા વાયુ કોણે-ઓં વૈકુણ્ઠ સેનાન્યે સૂત્રવતી સખાય નમઃ વૈકુણ્ઠસેનાન્યમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૯૭॥

દ્વારાદ્ બહિઃ ક્ષિતૌ પૂર્વસ્યાં ગારુડં દક્ષિણસ્યાં ચક્રં પશ્ચિમાયાં ગદાં ઉત્તરસ્યાં શઙ્ખં પૂજયેત્ । તદ્યથા-
સુપર્ણોઽસ્મિ ગરુત્માઁસ્ત્રિવૃતે શિરો ગાયત્રં ચક્ષુર્બૃહદ્રથન્તરે પક્ષૌ ।
સ્તોમ આત્મા છન્દાંસ્યઙ્ગાનિ યજૂંષિ નામ ।
સામ તે તનૂર્વામદેવ્યં યજ્ઞાયજ્ઞિયં પુચ્છં ધિષ્ણ્યાઃ શફાઃ ।
સુપર્ણોઽસિ ગરુત્માન્ દિવં ગચ્છઃ સ્વ પત ॥ (યજુ, ૧૨/૪)
દ્વારાદ્ બહિઃ ક્ષિતૌ પૂર્વસ્યામ્-ઓં ગરુડાય પક્ષિરાજાય નમઃ ગરુડમાવાહયામિ-ઇતિ ગરુડમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૯૮॥

લોકસ્ય દ્વારમર્ચિમત્ પવિત્રમ્ । જ્યોતિષ્મદ્ ભ્રાજમાનં મહસ્વત્ । અમૃતસ્ય ધારા બહુધા દોહમાનમ્ । ચરણાં નો લોકે સુધિતાં દધાતુ । (તૈત્તિરીય બ્રાહ્મણ, ૩/૧૨/૩/૪)
દ્વારાદ્ બહિઃ દક્ષિણસ્યામ્-ઓં સુદર્શનાય હેતિરાજાય નમઃ સુદર્શનમાવાહયામિ-ઇતિ સુદર્શનમાવાહ્ય સર્વોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૯૯॥

યા તે ભીમાન્યાયુધા તિગ્માનિ સન્તિ ધૂર્વણે ।
રક્ષા સમસ્ય નો નિદઃ ॥ (ઋક્, ૯/૬૧/૩૦, સામવેદ, ૨/૧૩૦)
દ્વારાદ્ બહિઃ પશ્ચિમાયામ્-ઓં કૌમોદક્યૈ ગદાધિપતયે નમઃ કૌમોદકી ગદામાવાહયામિ-ઇતિ ગદામાવાહ્ય સર્વોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૧૦૦॥

અગ્નિરૃષિઃ પવમાનઃ પાઞ્ચજન્યઃ પુરોહિતઃ ।
તમીમહે મહાગયમ્ ।
ઉપયામ ગૃહીતોઽસ્યગ્નયે ત્વા વર્ચસ એષ તે યોનિરગ્નયે ત્વા વર્ચસે ॥ (યજુ, ૨૬/૯)
દ્વારાદ્ બહિરુત્તરસ્યામ્-ઓં પાઞ્ચજન્યાય શઙ્ખાધિપતયે નમઃ પાઞ્ચજન્યમાવાહયામિ-ઇતિ શઙ્ખમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૧૦૧॥

તતોઽરુણ પૂર્ણ શોભાસુ પૂર્વાદિ ક્રમેણ વિમલા ઉત્કર્ષિણી જ્ઞાના ક્રિયા પ્રહ્વી સત્યા ઈશાના યોગા ઇત્યષ્ટૌ ચામરગ્રાહિણીઃ પૂજયેત્ । તદ્યથા-
અથૈનાષ્ટૌ વિરૂપાનાલભતેઽતિ દીર્ઘં ચાતિ હ્રસ્વં ચાતિ સ્થૂલં ચાતિ કૃશં ચાતિ શુક્લં ચાતિ કૃષ્ણં ચાતિ કુલ્વ ચાતિ લોમશં ચ ।
અશૂદ્રાઽબ્રાહ્મણાસ્તે પ્રાજાપત્યાઃ ।
માગધઃ પુંશ્ચલી કિતવઃ ક્લીબોઽશૂદ્રા અબ્રાહ્મણાસ્તે પ્રાજાપત્યાઃ ॥ (યજુ, ૩૦/૨૨)
ૐ વિમલાયૈ ચામરહસ્તાયૈ નમઃ વિમલામાવાહયામિ-ઇતિ પ્રાચ્યાં વિમલામાવાહ્ય ષોડશોપચારૈઃ સમર્ચયેત્ ॥ ૧૦૨॥

મૂર્ધાસિ રાડ્ ધ્રુવાસિ ધરુણા ધર્ત્ર્યસિ ધરણી । આયુષે ત્વા વર્ચસે ત્વા કૃષ્યૈ ત્વા ક્ષેમાય ત્વા । (યજુ, ૧૪/૨૧)
ૐ ઉત્કર્ષિણ્યૈ ચામરહસ્તાયૈ નમઃ ઉત્કર્ષિણીમાવાહયામિ-ઇત્યાગ્નેય્યામુત્કર્ષિણીમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૧૦૩॥

સંજ્ઞાનમસિ કામધરણં મયિ તે કામધરણં ભૂયાત્ । અગ્નેર્ભસ્માસ્યગ્નેઃ પુરીષમસિ ચિતસ્થ પરિચિત ઊર્ધ્વચિતઃ શ્રયધ્વમ્ । (યજુ, ૧૨/૪૬)
ૐ જ્ઞાનાયૈ ચામરહસ્તાયૈ નમઃ જ્ઞાનામાવાહયામિ-ઇતિ દક્ષિણસ્યાં જ્ઞાનમાવાહ્ય પૂર્વોક્ત રીત્યા પૂજયેત્ ॥ ૧૦૪॥

માતા ચ તે પિતા ચતે ઽગ્રે વૃક્ષસ્ય ક્રીડતઃ । વિચક્ષત ઇવ તે મુખં બ્રહ્મન્ મા ત્વં વદો બહુ । (યજુ, ૨૩/૨૫)
ૐ ક્રિયાયૈ ચામરહસ્તાયૈ નમઃ ક્રિયામાવાહયામિ-ઇતિ નૈરૃત્યાં ક્રિયામાવાહ્ય સર્વોપચારૈઃ સમર્ચયેત્ ॥ ૧૦૫॥

બહ્વીનાં પિતા બહુરસ્ય પુત્રશ્ચિશ્ચાકૃણોતિ સમનાવગત્ય ।
ઇષુધિઃ સઙ્કાઃ પૃતનાશ્ચ સર્વાઃ પૃષ્ઠે નિનદ્ધો જયતિ પ્રસૂતઃ ॥ (યજુ, ૨૯/૪૨)
ૐ પ્રહ્વ્યૈ ચામરહસ્તાયૈ નમઃ પ્રહ્વીમાવાહયામિ-ઇતિ પશ્ચિમાયાં પ્રહ્વીમાવાહ્ય ષોડશોપચારૈઃ પૂજયેત્ ॥ ૧૦૬॥

દૃષ્ટ્વા રૂપે વ્યાકરોત્ સત્યાનૃતે પ્રજાપતિઃ । અશ્રદ્ધામનૃતેઽદધાચ્છ્રદ્ધાં સત્યે પ્રજાપતિઃ । ઋતેન સત્યમિન્દ્રિયં વિપાનં શુક્રમન્ધસ ઇન્દ્રસ્યેન્દ્રિયમિદં પયોઽમૃતં મધુ । (યજુ, ૧૯/૭૭)
ૐ સત્યાયૈ ચામરહસ્તાયૈ નમઃ સત્યામાવાહયામિ-ઇતિ વાયવ્યાં સત્યામાવાહ્ય સર્વોપચારૈઃ સમર્ચયેત્ ॥ ૧૦૭॥

તમીશાનં જગતસ્તસ્થુષસ્પતિં ધિયં જિન્વમવસે હૂમહે વયમ્ ।
પૂષા નો યતા વેદસામસદ્વૃધે રક્ષિતા પાયુરબ્ધઃ સ્વસ્તયે ॥ (યજુ, ૨૫/૧૮)
ૐ ઈશાનાયૈ ચામરહસ્તાયૈ નમઃ ઈશાનામાવાહયામિ-ઇત્યુત્તરસ્યામીશાનામાવાહ્ય પૂર્વોક્ત રીત્યા પૂજયેત્ ॥ ૧૦૮॥

યોગે યોગે તવસ્તરં વાજે વાજે હવામહે ।
સખાય ઇન્દ્રમૂતયે ॥ (યજુ, ૧૧/૧૪)
ૐ યોગાયૈ ચામરહસ્તાયૈ નમઃ યોગામાવાહયામિ-ઇતીશાન્યાં યોગામાવાહ્ય પૂર્વોક્ત રીત્યા પૂજયેત્ ॥ ૧૦૯॥

તતઃ પીતોપશોભાસુ પૂર્વાદિ ક્રમેણાષ્ટ વસૂન્ પૂજયેત્ । તદ્યથા-
અપ્સ્વને સધિષ્ઠવ સૌષધીરનુ રુધ્યસે ।
ગર્ભેસઞ્જાયસે પુનઃ ॥ (યજુ, ૧૨/૩૬)
પૂર્વે-ઓં અદ્ભ્યો નમઃ અપઃ આવાહયામિ-ઇત્યપ આવાહ્ય ષોડશોપચારૈઃ પૂજયેત્ ॥ ૧૧૦॥

ધ્રુવાસિ ધ્રુવોઽયં યજમાનોઽસ્મિન્નાયતને પ્રજયા પશુભિર્ભૂયાત્ ।
ધૃતેન દ્યાવાપૃથિવી પૂર્યેથામિન્દ્રસ્ય છદિરસિ વિશ્વજનસ્ય છાયા ॥ (યજુ, ૫/૨૮)
અગ્નિ કોણે-ઓં ધ્રુવાય નમઃ ધ્રુવમાવાહયામિ-ઇતિ ધ્રુવમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૧૧૧॥

ઇમં દેવા અસપત્નં સુવધ્વં મહતે ક્ષત્રાય મહતે જ્યૈષ્ઠ્યાય મહતે જાનરાજ્યાયેન્દ્રસ્યેન્દ્રિયાય ।
ઇમમમુષ્ય પુત્રમમુષ્યૈ પુત્રમસ્યૈ વિશ એષ વોઽમી રાજા સોમોઽસ્માકં બ્રાહ્મણાનાં રાજા ॥ (યજુ, ૯/૪૦)
દક્ષિણે-ઓં સોમાય નમઃ સોમમાવાહયામિ-ઇતિ સોમમાવાહ્ય પૂર્વોક્ત રીત્યા સમર્ચયેત્ ॥ ૧૧૨॥

ભૂરસિ ભૂમિરસ્યદિતિરસિ વિશ્વધાયા વિશ્વસ્ય ભુવનસ્ય ધર્ત્રી ।
પૃથિવીં યચ્છ પૃથિવીં દૃંહ પૃથિવીં મા હિંસીઃ ॥ (યજુ, ૧૩/૧૮)
નિરૃતિ કોણે-ઓં ધરણ્યૈ નમઃ ધરણીમાવાહયામિ-ઇતિ ધરણીમાવાહ્ય સર્વોપચારૈઃ પૂજયેત્ ॥ ૧૧૩॥

મરુતો યસ્ય હિ ક્ષયે પાથા દિવો વિમહસઃ ।
સ સુગોપાતમો જનઃ ॥ (યજુ, ૮/૩૧)
પશ્ચિમે-ઓં અનિલાય નમઃ અનિલમાવાહયામિ-ઇત્યનિલમાવાહ્ય સમ્યગર્ચયેત્ ॥ ૧૧૪॥

અગ્નિદૂતં પુરો દધે હવ્યવાહમુપબ્રુવે ।
દેવાન્ આસાદયાદિહ ॥ (યજુ, ૨૨/૧૭)
ૐ પ્રત્યૂષાય નમઃ પ્રત્યૂષમાવાહયામિ-ઇત્યુત્તરે પ્રત્યૂષમાવાહ્ય સર્વોપચારૈઃ સમર્ચયેત્ ॥ ૧૧૬॥

વસુભ્યસ્ત્વા રુદ્રેભ્યસ્ત્વાઽઽદિત્યેભ્યસ્ત્વા સઞ્જાનાથાં દ્યાવાપૃથિવી મિત્રાવરુણૌ ત્વા વૃષ્ટ્યાવતામ્ ।
વ્યન્તુ વયોક્તં રિહાણા મરુતાં પૃષતીર્ગચ્છ પૃશ્નિર્ભૂત્વા દિવં ગચ્છ તતોનોવૃષ્ટિમાવહ ।
ચક્ષુષ્પા અગ્નેઽસિ ચક્ષુર્મે પાહિ ॥ (યજુ, ૨/૧૬)
ઈશાન કોણે-ઓં પ્રભાતાય નમઃ પ્રભાતમાવાહયામિ-ઇતિ પ્રભાતમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૧૧૭॥

તતઃ કૃષ્ણાર્ધ શોભાસુ પૂર્વાદિ ક્રમેણ અષ્ટકુલ નાગાન્ પૂજયેત્ । તદ્યથા-
તન્મિત્રસ્ય વરુણસ્યાભિચક્ષે સૂર્યો રૂપં કૃણુતે દ્યોરુપસ્થે ।
અનન્ત મન્યદ્રુશદસ્ય પાજઃ કૃષ્ટણમન્યદ્ધરિતઃ સં ભરન્તિ ॥ (યજુ, ૩૩/૩૮)
પૂર્વે-ઓં અનન્તાય નમઃ અનન્તમાવાહયામિ -ઇત્યનન્તમાવાહ્ય સર્વોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૧૧૮॥

નમોઽસ્તુ સર્પેભ્યો યે કે ચ પૃથિવીમનુ ।
યે અન્તરિક્ષે યે દિવિ તેભ્યઃ સર્પેભ્યો નમઃ ॥ (યજુ, ૧૩/૬)
આગ્નેય કોણે-ઓં વાસુકયે નમઃ વાસુકિમાવાહયામિ-ઇતિ વાસુકિમાવાહ્ય પૂર્વોક્ત રીત્યા સમર્ચયેત્ ॥ ૧૧૯ ॥

નમસ્તક્ષભ્યો રથકારેભ્યશ્ચ વો નમો નમઃ કુલાલેભ્યઃ કર્મારેભ્યશ્ચ વો નમો । નમો નિષાદેભ્યઃ પુઞ્જિષ્ઠેભ્યશ્ચ વો નમો નમઃ શ્વનિભ્યો મૃગયુભ્યશ્ચ વો નમઃ । (યજુ, ૧૬/૨૭)
દક્ષિણે-તક્ષકાય નમઃ તક્ષકમાવાહયામિ-ઇતિ તક્ષકમાવાહ્ય સર્વોપચારૈઃ સમર્ચયેત્ ॥ ૧૨૦ ॥

પુરુષ મૃગશ્ચન્દ્રમસો ગોધા કાલકા દાર્વા ઘાટસ્તે વનસ્પતીનાં કૃકવાકુઃ સાવિત્રો હંસો વાતસ્ય નાક્રો મકરઃ કુલીપયસ્તેઽકૂપારસ્ય હ્રિયૈ શલ્યકઃ ॥ (યજુ, ૨૪/૩૫)
નૈરૃતિ કોણે-ઓં કુલીરાય નમઃ કુલીરમાવાહયામિ-ઇતિ કુલીરમાવાહ્ય પૂજોપચારૈઃ સમર્ચયેત્ ॥ ૧૨૧ ॥

ઇન્દ્રસ્ય રૂપમૃષભો બલાય કર્ણાભ્યાં શ્રોત્રમમૃતં ગ્રહાભ્યામ્ ।
યવા ન બહિર્ભ્રુવિ કેસરાણિ કર્કન્ધુ જજ્ઞે મધુ સારઘમ્મુખાત્ ॥ (યજુ,૧૯/૯૧)
પશ્ચિમે-ઓં કર્કોટાય નમઃ કર્કોટમાવાહયામિ-ઇતિ કર્કોટમાવાહ્ય ષોડશોપચારૈઃ સમર્ચયેત્ ॥ ૧૨૨ ॥

પ્રતિશ્રુત્કાયા અર્તનં ઘોષાય ભષમન્તાય બહુવાદિનમનન્તાય મૂકં શબ્દાયાઽમ્બરાઘાતં મહસે વીણાવાદં ક્રોશાય તૃનવધ્મમવરસ્પરાય શઙ્ખધ્મં વનપમન્યતોરણ્યાય દાવપમ્ ॥ (યજુ, ૩૦/૧૯)
વાયુ કોણે-ઓં શઙ્ખપાલાય નમઃ શઙ્ખપાલમાવાહયામિ-ઇતિ શઙ્ખપાલમાવાહ્ય પૂર્વોક્ત રીત્યા સમર્ચયેત્ ॥ ૧૨૩ ॥

પ્રાણાય સ્વાહાઽપાનાય સ્વાહા વ્યાનાય સ્વાહા ।
અમ્બે અમ્બિકેઽમ્બાલિકે ન મા નયતિ કશ્ચન ।
સસત્યશ્વકઃ સુભદ્રિકાં કામ્પીલ વાસિનીમ્ ॥ (યજુ, ૨૩/૧૮)
ઉત્તરે-ઓં કમ્બલાય નમઃ કમ્બલમાવાહયામિ-ઇતિ કમ્બલમાવાહ્ય સર્વોપચારૈઃ સમ્પૂજયેત્ ॥ ૧૨૪ ॥

યૂપબ્રસ્કા ઉત તે યૂપવાહાશ્ચષાલં યે અશ્વયૂપાય તક્ષતિ ।
ય ચાર્વતે પચનં સમ્ભરન્ત્યુતો તેષામભિગૂર્ત્તિર્ન ઇન્વતુ ॥ (યજુ, ૨૫/૨૯)
ઈશાન કોણે-ઓં અશ્વતરાય નમઃ અશ્વતરમાવાહયામિ-ઇત્યશ્વતરમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૧૨૫ ॥

આગ્નેય પ્રભૃતિષુ ચતુષ્કોણેષુ ચતુર્વ્યૂહાન્ પૂજયેત્ । તદ્યથા-
ભાયૈ દાર્વાહારં પ્રભાયા અગ્ન્યેધં બ્રધ્નસ્ય વિષ્ટપાયાભિષેક્તારં વર્ષિષ્ઠાય નાકાય પરિવેષ્ટિતારં દેવલોકાય પેશિતારં મનુષ્ય લોકાય પ્રકારિતારં સર્વેભ્યો લોકેભ્ય ઉપસેક્તારમવ ઋત્યૈ વધાયોપમન્થિતારં મેધાય વાસઃ પલ્પૂલીં પ્રકામાય રજયિત્રીમ્ ॥ (યજુ, ૩૦/૧૨)
ૐ વાસુદેવાય પરમેષ્ઠ્યાત્મને નમઃ વાસુદેવમાવાહયામિ-ઇત્યાગ્નેયાં વાસુદેવમાવાહ્ય સર્વોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૧૨૬ ॥

કાર્ષિરસિ સમુદ્રસ્ય ત્વા ક્ષિત્યા ઉન્નયામિ ।
સમાપો અદ્‌ભિરગ્મત સમોષધીભિરોષધીઃ ॥ (યજુ, ૬/૨૮)
ૐ સઙ્કર્ષણાય પુરુષાત્મને નમઃ સઙ્કર્ષણમાવાહયામિ-ઇતિ નૈરૃત્યાં સઙ્કર્ષણમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૧૨૭॥

મિત્રસ્ય ચર્ષણી ધૃતોઽવો દેવસ્ય સાનસિ ।
દ્યુમ્નં ચિત્રશ્રવસ્તમમ્ ॥ (યજુ, ૧૧/૬૨)
ૐ પ્રદ્યુમ્નાય વિશ્વાત્મને નમઃ પ્રદ્યુમ્નમાવાહયામિ-ઇતિ વાયવ્યાં પ્રદ્યુમ્નમાવાહ્ય સર્વોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૧૨૮॥

ઋતં સત્યમૃતં સત્યમગ્નિં પુરીષ્યમઙ્ગિરસ્વદ્ ભરામઃ ।
ઓષધયં પ્રતિમોદધ્વમગ્નિમેતં શિવમાયન્તમભ્યત્ર યુષ્માઃ ।
વ્યસ્યન્ વિશ્વા અનિરા અમીવા નિષીદન્નો અપ દુર્મતિં જહિ ॥ (યજુ, ૧૧/૪૭)
ૐ અનિરુદ્ધાય નિવૃત્ત્યાત્મને નમઃ અનિરુદ્ધમાવાહયામિ-ઇતીશાન્યાં અનિરુદ્ધમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૧૨૯॥

બાહ્ય પરિધિષુ સત્ત્વાદિ ગુણ ત્રય સમ્ભૂતાન પૂજયેત્ । તદ્યથા-
ત્રિર્દેવઃ પૃથિવીમેષ એતાં વિ ચક્રમે શતર્ચસં મહિત્વા ।
પ્ર વિષ્ણુરસ્તુ તવસસ્તવીયાન્ ત્વેષં હ્યસ્ય સ્થવિરસ્ય નામ ॥

(ઋક્, ૭/૧૦૦/૩, તૈત્તિરીય બ્રાહ્મણ, ૨/૪/૩/૫)
બાહ્ય શુક્લ પરિધૌ-ઓં સત્ત્વગુણસમ્ભૂતેભ્યો નમઃ સત્ત્વગુણસમ્ભૂતાન્યાવાહયામિ-ઇતિ સત્ત્વગુણસમ્ભૂતાન્યાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજ્ય પ્રણમેત્ ॥ ૧૩૦॥

હિરણ્યગર્ભઃ સમવર્તતાગ્રે ભૂતસ્ય જાતઃ પતિરેક આસીત્ ।
સ દાધાર પૃથિવીં દ્યામુતેમાઁ કસ્મૈ દેવાય હવિષા વિધેમ ॥

(ઋક્, ૧૦/૧૨૧/૧, અથર્વ, ૪/૨/૭, યજુ, ૧૩/૪, ૨૩/૧, ૨૫/૧૦, તૈત્તિરીય સંહિતા, ૪/૧/૮/૩)
બાહ્યારુણ પરિધૌ-ઓં રજોગુણસમ્ભૂતેભ્યો નમઃ રજોગુણસમ્ભૂતાન્યાવાહયામિ-ઇતિ રજોગુણસમ્ભૂતાન્યાવાહ્ય સર્વોપચારૈઃ સમર્ચયેત્ ॥ ૧૩૧॥

અસઙ્ખ્યાતા સહસ્રાણિ યે રુદ્રા અધિ ભૂમ્યામ્ ।
તેષાં સહસ્ર યોજનેઽવ ધન્વનિ તન્મસિ ॥ (યજુ, ૧૬/૫૪)
બાહ્ય કૃષ્ણ પરિધૌ-ઓં તમોગુણ સમ્ભૂતેભ્યો નમઃ તમોગુણ સમ્ભૂતમાવાહયામિ-ઇતિ તમોગુણ સમ્ભૂતમાવાહ્ય ષોડશોપચારૈઃ સમ્પૂજયેત્ ॥ ૧૩૨॥

એવં ચક્રાબ્જ મણ્ડલે દેવાનાવાહ્ય સંસ્થાપ્ય સમ્પૂજયેત્ ।
નમોઽસ્મદાચાર્ય પરમ્પરાભ્યો નમો નમો ભાગવતબ્રજેભ્યઃ ।
નમો નમોઽનન્તમુખામરેભ્યો નમઃ, શ્રિયૈ શ્રીપતયે નમોઽસ્તુ ।
ઇતિ શ્રીમદ્વેદમાર્ગ પ્રતિષ્ઠાપનાચાર્ય વેદાન્ત-પ્રવર્તકાચાર્ય શ્રીમત્ પરમહંસ પરિવ્રાજકાચાર્ય સત્સમ્પ્રદાયાચાર્ય જગદ્ગુરુ ભગવદનન્ત-પાદીય શ્રીમદ્વિષ્વક્સેનાચાર્ય્ય સ્વામિના (ત્રિદણ્ડી સ્વામીતિ ખ્યાતઃ)સઙ્કુલિતઃ ચક્રાબ્જ મણ્ડલ દેવતા પૂજા વિધિઃ ।

Compiled, encoded, and proofread by Arun Kumar Upadhyay

---

*Shri Jagannatha Vaidika Puja Paddhati*

pdf was typeset on July 13, 2024

Please send corrections to *sanskrit@cheerful.com*